

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## पञ्चमकाण्डे पञ्चमः प्रश्नः

### वायव्यपश्वाद्यानं निरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यदेके॑न। एके॑न सग्ंस्था॒पय॑ति। स॒ग्ं॒स्था॒पय॑ति य॒ज्ञस्य॑। स॒ग्ं॒स्था॒प॒यतीति॑ सम्—स्था॒पय॑ति। य॒ज्ञस्य॒ सन्त॑त्यै। सन्त॑त्या॒ अवि॑च्छेदाय। सन्त॑त्या॒ इति॒ सम्—त॒त्यै॒। अवि॑च्छेदा॒यैन्द्राः। अवि॑च्छेदा॒येत्यवि॑—छे॒दा॒य॒। ऐ॒न्द्राः प॒शव॑ः। प॒शवो॒ ये। ये मु॑ष्क॒राः। मु॒ष्क॒रा यत्। यदै॒न्द्राः। ऐ॒न्द्राः सन्त॑ः। सन्तो॒ऽग्निभ्य॑ः। अ॒ग्निभ्य॑ आल॒भ्यन्ते᳚। अ॒ग्निभ्य॒ इत्य॒ग्नि—भ्य॒ः। आ॒ल॒भ्यन्ते॑ दे॒वता᳚भ्यः। आ॒ल॒भ्यन्त॒ इत्या᳚—ल॒भ्यन्ते᳚। दे॒वता᳚भ्यः स॒मद᳚म्। स॒मद॑म् दधाति। स॒मद॒मिति॑ स—मद᳚म्। द॒धा॒त्या॒ग्ने॒यीः। आ॒ग्ने॒यीस्त्रि॒ष्टुभ॑ः। त्रि॒ष्टुभो᳚ याज्यानुवा॒क्या᳚ः। या॒ज्या॒नु॒वा॒क्या᳚ः कुर्या॑त्। या॒ज्या॒नु॒वा॒क्या॑ इति॑ याज्या—अ॒नु॒वा॒क्या᳚ः। कु॒र्या॒द् यत्। यदा᳚ग्ने॒यीः। आ॒ग्ने॒यीस्तेन॑। तेना᳚ग्ने॒याः। आ॒ग्ने॒या यत्। यत् त्रि॒ष्टुभ॑ः। त्रि॒ष्टु॒भस्तेन॑। तेनै॒न्द्राः। ऐ॒न्द्राः समृ॑द्ध्यै। समृ॑द्ध्यै॒ न। समृ॑द्ध्या॒ इति॒ सम्—ऋ॒द्ध्यै॒। न दे॒वता᳚भ्यः। दे॒वता᳚भ्यः स॒मद᳚म्। स॒मद॑म् दधाति। स॒मद॒मिति॑ स—मद᳚म्। द॒धा॒ति॒ वा॒यवे᳚। वा॒यवे॑ नि॒युत्व॑ते। नि॒युत्व॑ते तू॒परम्। नि॒युत्व॑त॒ इति॑ नि—युत्व॑ते। तू॒परमा। आ ल॑भते। ल॒भ॒ते॒ तेज॑ः। तेजो॒ऽग्नेः। अ॒ग्नेर् वा॒युः। वा॒युस्तेज॑से। तेज॑स ए॒षः। ए॒ष आ। आ ल॑भ्यते। ल॒भ्य॒ते॒ तस्मा᳚त्। तस्मा᳚द् य॒द्रिय॑ङ्ङ्। य॒द्रिय॑ङ्. वा॒युः। वा॒युर् वाति॑।
॥ [१] ॥ वाति॑ त॒द्रिय॑ङ्ङ्। त॒द्रिय॑ङ्ङ॒ग्निः। अ॒ग्निर् द॑हति। द॒ह॒ति॒ स्वम्। स्वमे॒व। ए॒व तत्। तत् तेज॑ः। तेजोऽनु॑। अन्वे॑ति। ए॒ति॒ यत्। यन् न। न नि॒युत्व॑ते। नि॒युत्व॑ते॒ स्यात्। नि॒युत्व॑त॒ इति॑ नि—युत्व॑ते। स्यादुत्। उन् मा᳚द्येत्। मा॒द्ये॒द् यज॑मानः। यज॑मानो नि॒युत्व॑ते। नि॒यु-

त्वते भवति। नियुत्वत इति नि—युत्वते। भवति यजमानस्य। यजमानस्यानुन्मादाय। अनु-
न्मादाय वायुमती। अनुन्मादायेत्यनुत्—मादाय। वायुमती श्वेतवती। वायुमती इति वायु—
मती। श्वेतवती याज्यानुवाक्ये। श्वेतवती इति श्वेत—वती। याज्यानुवाक्ये भवतः। याज्यानु-
वाक्ये इति याज्या—अनुवाक्ये। भवतः सतेजस्त्वाय। सतेजस्त्वाय हिरण्यगर्भः। सतेजस्त्वा-
येति सतेजः—त्वाय। हिरण्यगर्भः सम्। हिरण्यगर्भ इति हिरण्य—गर्भः। समवर्तत। अव-
र्तताग्रे। अग्र इति। इत्याघारम्। आघारमा। आघारमित्या—घारम्। आ घारयति। घार-
यति प्रजापतिः। प्रजापतिर् वै। प्रजापतिरिति प्रजा—पतिः। वै हिरण्यगर्भः। हिरण्यगर्भः
प्रजापतेः। हिरण्यगर्भ इति हिरण्य—गर्भः। प्रजापतेरनुरूपत्वाय। प्रजापतेरिति प्रजा—पतेः।
अनुरूपत्वाय सर्वाणि। अनुरूपत्वायेत्यनुरूप—त्वाय। सर्वाणि वै। वा एषः। एष रूपाणि।
रूपाणि पशूनाम्। पशूनाम् प्रति। प्रत्या। आ लभ्यते। लभ्यते यत्। यच्छ्मश्रुणः। श्मश्रु-
णस्तत्। तत् पुरुषाणाम्। ॥ [२] ॥ पुरुषाणाꣳ रूपम्। रूपय्यँत्। यत् तूपरः। तूपरस्तत्।
तदश्वानाम्। अश्वानाय्यँत्। यदन्यतोदन्न्। अन्यतोदन् तत्। अन्यतोदन्नित्यन्यतः—दन्न्। तद्
गवाम्। गवाय्यँत्। यदव्याः। अव्या इव। इव शफाः। शफास्तत्। तदवीनाम्। अवीनाय्यँत्।
यदजः। अजस्तत्। तदजानाम्। अजानाँव्वायुः। वायुर् वै। वै पशूनाम्। पशूनाम् प्रियम्।
प्रियम् धाम। धाम यत्। यद् वायव्यः। वायव्यो भवति। भवत्येतम्। एतमेव। एवैनम्। एन-
मभि। अभि सञ्ज्ञानानाः। सञ्ज्ञानानाः पशवः। सञ्ज्ञानाना इति सम्—जानानाः। पशव उप।
उप तिष्ठन्ते। तिष्ठन्ते वायव्यः। वायव्यः कार्या(३)ः। कार्या(३)ः प्राजापत्या(३)ः। प्राजा-
पत्या(३) इति। प्राजापत्या(३) इति प्राजा—पत्या(३)ः। इत्याहुः। आहुर् यत्। यद् वायव्यम्।
वायव्यम् कुर्यात्। कुर्यात् प्रजापतेः। प्रजापतेरियात्। प्रजापतेरिति प्रजा—पतेः। इयाद् यत्।
यत् प्राजापत्यम्। प्राजापत्यम् कुर्यात्। प्राजापत्यमिति प्राजा—पत्यम्। कुर्याद् वायोः। वायो-
रियात्। ॥ [३] ॥ इयाद् यत्। यद् वायव्यः। वायव्यः पशुः। पशुर् भवति। भवति तेन।
तेन वायोः। वायोर् न। नैति। एति यत्। यत् प्राजापत्यः। प्राजापत्यः पुरोडाशः। प्राजापत्य
इति प्राजा—पत्यः। पुरोडाशो भवति। भवति तेन। तेन प्रजापतेः। प्रजापतेर् न। प्रजापते-
रिति प्रजा—पतेः। नैति। एति यत्। यद् द्वादशकपालः। द्वादशकपालस्तेन। द्वादशकपाल

इति द्वादश—कपालः। तेन वैश्वानरात्। वैश्वानरान् न। नैति। एत्याग्नावैष्णवम्। आग्नावै-
ष्णवमेकादशकपालम्। आग्नावैष्णवमित्याग्ना—वैष्णवम्। एकादशकपालम् निः। एकादश-
कपालमित्येकादश—कपालम्। निर् वपति। वपति दीक्षिष्यमाणः। दीक्षिष्यमाणोऽग्निः।
अग्निः सर्वाः। सर्वा देवताः। देवता विष्णुः। विष्णुर् यज्ञः। यज्ञो देवताः। देवताश्च। चैव।
एव यज्ञम्। यज्ञम् च। चा। आ रभते। रभतेऽग्निः। अग्निरवमः। अवमो देवतानाम्। देव-
तानाँव्विष्णुः। विष्णुः परमः। परमो यत्। यदाग्नावैष्णवम्। आग्नावैष्णव,मेकादशकपालम्।
आग्नावैष्णवमित्याग्ना—वैष्णवम्। एकादशकपालम् निर्वपति। एकादशकपालमित्येकादश—
कपालम्। निर्वपति देवताः। निर्वपतीति निः—वपति। देवता एव। ॥ [४] ॥ एवोभयतः।
उभयतः परिगृह्य। परिगृह्य यजमानः। परिगृह्येति परि—गृह्य। यजमानोऽव। अव रुन्धे।
रुन्धे पुरोडाशेन। पुरोडाशेन वै। वै देवाः। देवा अमुष्मिन्न्। अमुष्मिँल्लोके। लोक आर्द्ध्नुवन्न्।
आर्द्ध्नुवन् चरुणा। चरुणाऽस्मिन्न्। अस्मिन्न्यः। यः कामयेत। कामयेतामुष्मिन्न्। अमुष्मि-
ँल्लोके। लोक ऋद्ध्नुयाम्। ऋद्ध्नुयामिति। इति सः। स पुरोडाशम्। पुरोडाशम् कुर्वीत।
कुर्वीतामुष्मिन्न्। अमुष्मिन्नेव। एव लोके। लोक ऋद्ध्नोति। ऋद्ध्नोति यत्। यदष्टाकपालः।
अष्टाकपालस्तेन। अष्टाकपाल इत्यष्टा—कपालः। तेनाग्नेयः। आग्नेयो यत्। यत् त्रिकपालः।
त्रिकपालस्तेन। त्रिकपाल इति त्रि—कपालः। तेन वैष्णवः। वैष्णवः समृद्ध्यै। समृद्ध्यै यः।
समृद्ध्या इति सम्—ऋद्ध्यै। यः कामयेत। कामयेतास्मिन्न्। अस्मिँल्लोके। लोक ऋद्ध्नुयाम्।
ऋद्ध्नुयामिति। इति सः। स चरुम्। चरुम् कुर्वीत। कुर्वीताग्नेः। अग्नेर् घृतम्। घृतँव्विष्णोः।
विष्णोस्तण्डुलाः। तण्डुलास्तस्मात्। तस्माच् चरुः। ॥ [५] ॥ चरुः कार्यः। कार्योऽस्मिन्न्।
अस्मिन्नेव। एव लोके। लोक ऋद्ध्नोति। ऋद्ध्नोत्यादित्यः। आदित्यो भवति। भवतीयम्।
इयँव्वै। वा अदितिः। अदितिरस्याम्। अस्यामेव। एव प्रति। प्रति तिष्ठति। तिष्ठत्यथो। अथो
अस्याम्। अथो इत्यथो। अस्यामेव। एवाधि। अधि यज्ञम्। यज्ञम् तनुते। तनुते यः। यो
वै। वै संव्ँवथ्सरम्। संव्ँथ्सरमुख्यम्। संव्ँवथ्सरमिति सम्—वथ्सरम्। उख्यमभृत्वा। अभृ-
त्वाऽग्निम्। अग्निम् चिनुते। चिनुते यथा। यथा सामि। सामि गर्भः। गर्भोऽवपद्यते। अवपद्यते
तादृक्। अवपद्यत इत्यव—पद्यते। तादृगेव। एव तत्। तदार्तिम्। आर्तिमा। आर्च्छेत्। ऋच्छेद्

वैश्वानरम्। वैश्वानरम् द्वादशकपालम्। द्वादशकपालम् पुरस्तात्। द्वादशकपालमिति द्वादश—कपालम्। पुरस्तान् निः। निर् वपेत्। वपेथ् सँव्वथ्सरः। सँव्वथ्सरो वै। सँव्वथ्सर इति सम्—वथ्सरः। वा अग्निः। अग्निर् वैश्वानरः। वैश्वानरो यथा। यथा सँव्वथ्सरम्। सँव्वथ्सरमाप्त्वा। सँव्वथ्सरमिति सम्—वथ्सरम्। आप्त्वा काले। ॥ [६] ॥ काल आगते। आगते विजायते। आगत इत्या—गते। विजायत एवम्। विजायत इति वि—जायते। एवमेव। एव सँव्वथ्सरम्। सँव्वथ्सरमाप्त्वा। सँव्वथ्सरमिति सम्—वथ्सरम्। आप्त्वा काले। काल आगते। आगतेऽग्निम्। आगत इत्या—गते। अग्निम् चिनुते। चिनुते न। नार्तिम्। आर्तिमा। आर्च्छति। ऋच्छत्येषा। एषा वै। वा अग्नेः। अग्नेः प्रिया। प्रिया तनूः। तनूर् यत्। यद् वैश्वानरः। वैश्वानरः प्रियाम्। प्रियामेव। एवास्य। अस्य तनुवम्। तनुवमव। अव रुन्धे। रुन्धे त्रीणि। त्रीण्येतानि। एतानि हवीꣳषि। हवीꣳषि भवन्ति। भवन्ति त्रयः। त्रय इमे। इमे लोकाः। लोका एषाम्। एषाँल्लो-कानाम्। लोकानाꣳ रोहाय। रोहायेति रोहाय॥ ॥ [७] ॥

(यद्वियङ्ङ् वायु र्यच्छ्रमश्रुणस्तद् वायो र्निर्वपति देवता स्तस्मा दाप्त्वा ऽष्टात्रिꣳशच्च) ॥ १ ॥

प्रजापतिः प्रजाः। प्रजापतिरिति प्रजा—पतिः। प्रजाः सृष्ट्वा। प्रजा इति प्र—जाः। सृष्ट्वा प्रेणा। प्रेणाऽनु। अनु प्र। प्राविशत्। अविशत् ताभ्यः। ताभ्यः पुनः। पुनः सम्भवितुम्। सम्भवितुम् न। सम्भवितुमिति सम्—भवितुम्। नाशक्नोत्। अशक्नोथ् सः। सोऽब्रवीत्। अब्र-वीदृद्ध्नवत्। ऋद्ध्नवदित्। इथ् सः। स यः। यो मा। मेतः। इतः पुनः। पुनः सञ्चिनवत्। सञ्चिनवदिति। सञ्चिनवदिति सम्—चिनवत्। इति तम्। तम् देवाः। देवाः सम्। समचिन्वन्न्। अचिन्वन् ततः। ततो वै। वै ते। त आर्ध्नुवन्न्। आर्ध्नुवन्यत्। यथ् समचिन्वन्न्। सम-चिन्वन् तत्। समचिन्वन्निति सम्—अचिन्वन्न्। तच् चित्यस्य। चित्यस्य चित्यत्वम्। चित्य-त्वय्ँयः। चित्यत्वमिति चित्य—त्वम्। य एवम्। एवव्ँविद्वान्। विद्वानग्निम्। अग्निम् चिनुते। चिनुत ऋद्ध्नोति। ऋद्ध्नोत्येव। एव कस्मै। कस्मै कम्। कमग्निः। अग्निश्चीयते। चीयत इति। इत्याहुः। आहुरग्निवान्। अग्निवानसानि। अग्निवानित्यग्नि—वान्। ॥ [८] ॥ असा-नीति। इति वै। वा अग्निः। अग्निश्चीयते। चीयतेऽग्निवान्। अग्निवानेव। अग्निवानित्यग्नि—

वान्। एव भवति। भवति कस्मै। कस्मै कम्। कमग्निः। अग्निश्चीयते। चीयत इति। इत्याहुः। आहुर् देवाः। देवा मा। मा वेदन्न्। वेदन्निति। इति वै। वा अग्निः। अग्निश्चीयते। चीयते विदुः। विदुरेनम्। एनम् देवाः। देवाः कस्मै। कस्मै कम्। कमग्निः। अग्निश्चीयते। चीयत इति। इत्याहुः। आहुर् गृही। गृह्यसानि। असानीति। इति वै। वा अग्निः। अग्निश्चीयते। चीयते गृही। गृह्येव। एव भवति। भवति कस्मै। कस्मै कम्। कमग्निः। अग्निश्चीयते। चीयत इति। इत्याहुः। आहुः पशुमान्। पशुमानसानि। पशुमानिति पशु—मान्। असानीति। इति वै। वा अग्निः। अग्निश्चीयते। ॥ [९] ॥ चीयते पशुमान्। पशुमानेव। पशुमानिति पशु—मान्। एव भवति। भवति कस्मै। कस्मै कम्। कमग्निः। अग्निश्चीयते। चीयत इति। इत्याहुः। आहुः सप्त। सप्त मा। मा पुरुषाः। पुरुषा उप। उप जीवान्। जीवानिति। इति वै। वा अग्निः। अग्निश्चीयते। चीयते त्रयः। त्रयः प्राञ्चः। प्राञ्चस्त्रयः। त्रयः प्रत्यञ्चः। प्रत्यञ्च आत्मा। आत्मा सप्तमः। सप्तम एतावन्तः। एतावन्त एव। एवैनम्। एनममुष्मिन्न्। अमुष्मिँल्लोके। लोक उप। उप जीवन्ति। जीवन्ति प्रजापतिः। प्रजापतिरग्निम्। प्रजापतिरिति प्रजा—पतिः। अग्निमचिकी-षत। अचिकीषत तम्। तम् पृथिवि। पृथिव्यब्रवीत्। अब्रवीन् न। न मयि। मय्यग्निम्। अग्निम् चेष्यसे। चेष्यसेऽति। अति मा। मा धक्ष्यति। धक्ष्यति सा। सा त्वा। त्वाऽतिदह्यमाना। अतिदह्यमाना वि। अतिदह्यमानेत्यति—दह्यमाना। वि धविष्ये। धविष्ये सः। ॥ [१०] ॥ स पापीयान्। पापीयान् भविष्यसि। भविष्यसीति। इति सः। सोऽब्रवीत्। अब्रवीत् तथा। तथा वै। वा अहम्। अहम् करिष्यामि। करिष्यामि यथा। यथा त्वा। त्वा न। नातिधक्ष्यति। अति-धक्ष्यतीति। अतिधक्ष्यतीत्यति—धक्ष्यति। इति सः। स इमाम्। इमामभि। अभ्यमृशत्। अमृशत् प्रजापतिः। प्रजापतिस्त्वा। प्रजापतिरिति प्रजा—पतिः। त्वा सादयतु। सादयतु तया। तया देवतया। देवतयाऽङ्गिरस्वत्। अङ्गिरस्वद् ध्रुवा। ध्रुवा सीद। सीदेति। इतीमाम्। इमामेव। एवेष्टकाम्। इष्टकाम् कृत्वा। कृत्वोप। उपाधत्त। अधत्तानतिदाहाय। अनतिदाहाय यत्। अनतिदाहायेत्यनति—दाहाय। यत् प्रति। प्रत्यग्निम्। अग्निम् चिन्वीत। चिन्वीत तत्। तदभि। अभि मृशेत्। मृशेत् प्रजापतिः। प्रजापतिस्त्वा। प्रजापतिरिति प्रजा—पतिः। त्वा साद-यतु। सादयतु तया। तया देवतया। देवतयाऽङ्गिरस्वत्। अङ्गिरस्वद् ध्रुवा। ध्रुवा सीद।

सीदेति। ॥ [११] ॥ इतीमाम्। इमामेव। एवेष्टकाम्। इष्टकाम् कृत्वा। कृत्वोप। उप धत्ते। धत्तेऽनतिदाहाय। अनतिदाहाय प्रजापतिः। अनतिदाहायेत्यनति—दाहाय। प्रजापतिरकाम-यत। प्रजापतिरिति प्रजा—पतिः। अकामयत प्र। प्र जायेय। जायेयेति। इति सः। स एतम्। एतमुख्यम्। उख्यमपश्यत्। अपश्यत् तम्। तꣳ संवथ्सरम्। संवथ्सरमबिभः। संवथ्सर-मिति सम्—वथ्सरम्। अबिभस्ततः। ततो वै। वै सः। स प्र। प्राजायत। अजायत तस्मात्। तस्माथ् संवथ्सरम्। संवथ्सरम् भार्यः। संवथ्सरमिति सम्—वथ्सरम्। भार्यः प्र। प्रैव। एव जायते। जायते तम्। तंवसवः। वसवोऽब्रुवन्न्। अब्रुवन् प्र। प्र त्वम्। त्वमजनिष्ठाः। अजनिष्ठा वयम्। वयम् प्र। प्र जायामहै। जायामहा इति। इति तम्। तंवसुभ्यः। वसुभ्यः प्र। वसुभ्य इति वसु—भ्यः। प्रायच्छत्। अयच्छत् तम्। तम् त्रीणि। त्रीण्यहानि। अहान्यबि-भरुः। अबिभरुस्तेन। तेन त्रीणि। ॥ [१२] ॥ त्रीणि च। च शतानि। शतान्यसृजन्त। असृ-जन्त त्रयस्त्रिꣳशतम्। त्रयस्त्रिꣳशतम् च। त्रयस्त्रिꣳशतमिति त्रयः—त्रिꣳशतम्। च तस्मात्। तस्मात् त्र्यहम्। त्र्यहम् भार्यः। त्र्यहमिति त्रि—अहम्। भार्यः प्र। प्रैव। एव जायते। जायते तान्। तान् रुद्राः। रुद्रा अब्रुवन्न्। अब्रुवन् प्र। प्र यूयम्। यूयमजनिढ्वम्। अजनिढ्वंवयम्। वयम् प्र। प्र जायामहै। जायामहा इति। इति तम्। तꣳ रुद्रेभ्यः। रुद्रेभ्यः प्र। प्रायच्छन्न्। अयच्छन् तम्। तꣳ षट्। षडहानि। अहान्यबिभरुः। अबिभरुस्तेन। तेन त्रीणि। त्रीणि च। च शतानि। शतान्यसृजन्त। असृजन्त त्रयस्त्रिꣳशतम्। त्रयस्त्रिꣳशतम् च। त्रयस्त्रिꣳशतमिति त्रयः—त्रिꣳशतम्। च तस्मात्। तस्माथ् षडहम्। षडहम् भार्यः। षडहमिति षट्—अहम्। भार्यः प्र। प्रैव। एव जायते। जायते तान्। तानादित्याः। आदित्या अब्रुवन्न्। अब्रुवन् प्र। प्र यूयम्। यूयमजनिढ्वम्। अजनिढ्वंवयम्। वयम् प्र। ॥ [१३] ॥ प्र जायामहै। जायामहा इति। इति तम्। तमादित्येभ्यः। आदित्येभ्यः प्र। प्रायच्छन्न्। अयच्छन् तम्। तम् द्वादश। द्वादशाहानि। अहान्यबिभरुः। अबिभरुस्तेन। तेन त्रीणि। त्रीणि च। च शतानि। शतान्यसृ-जन्त। असृजन्त त्रयस्त्रिꣳशतम्। त्रयस्त्रिꣳशतम् च। त्रयस्त्रिꣳशतमिति त्रयः—त्रिꣳशतम्। च तस्मात्। तस्माद् द्वादशाहम्। द्वादशाहम् भार्यः। द्वादशाहमिति द्वादश—अहम्। भार्यः प्र। प्रैव। एव जायते। जायते तेन। तेन वै। वै ते। ते सहस्रम्। सहस्रमसृजन्त। असृजन्तोखाम्।

उखाꣳ सहस्रतमीम्। सहस्रतमीय्यँः। सहस्रतमीमिति सहस्र—तमीम्। य एवम्। एवमुख्यम्। उख्यꣳ साहस्रम्। साहस्रव्ँवेद। वेद प्र। प्र सहस्रम्। सहस्रम् पशून्। पशूनाप्नोति। आप्नोतीत्याप्नोति॥ ॥ [१४] ॥

(अग्निवान् पशुमान्सानीति वा अग्नि र्द्धविष्ये मृशेत् प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्व ध्रुवा सीद तेन तानादित्या अब्रुवन् प्र यूयमजनिढ्वम् वयम् चत्वारिꣳशच्च) ॥ २ ॥

यजुषा वै। वा एषा। एषा क्रियते। क्रियते यजुषा। यजुषा पच्यते। पच्यते यजुषा। यजुषा वि। वि मुच्यते। मुच्यते यत्। यदुखा। उखा सा। सा वै। वा एषा। एषैतर्हि। एतर्हि यातयाम्नी। यातयाम्नी सा। यातयाम्नीति यात—याम्नी। सा न। न पुनः। पुनः प्रयुज्या। प्रयुज्येति। प्रयुज्येति प्र—युज्या। इत्याहुः। आहुरग्ने। अग्ने युख्व। युख्वा हि। हि ये। ये तव। तव युख्व। युख्वा हि। हि देवहूतमान्। देवहूतमाꣳ इति। देवहूतमानिति देव—हूतमान्। इत्युखायाम्। उखायाम् जुहोति। जुहोति तेन। तेनैव। एवैनाम्। एनाम् पुनः। पुनः प्र। प्र युङ्क्ते। युङ्क्ते तेन। तेनायातयाम्नी। अयातयाम्नी यः। अयातयाम्नीत्ययात—याम्नी। यो वै। वा अग्निम्। अग्निय्योगे। योग आगते। आगते युनक्ति। आगत इत्या—गते। युनक्ति युङ्क्ते। युङ्क्ते युञ्जानेषु। युञ्जानेष्वग्ने। अग्ने युख्व। ॥ [१५] ॥ युख्वा हि। हि ये। ये तव। तव युख्व। युख्वा हि। हि देवहूतमान्। देवहूतमाꣳ इति। देवहूतमानिति देव—हूतमान्। इत्याह। आहैषः। एष वै। वा अग्नेः। अग्नेर् योगः। योगस्तेन। तेनैव। एवैनम्। एनय्युनक्ति। युनक्ति युङ्क्ते। युङ्क्ते युञ्जानेषु। युञ्जानेषु ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति न्यङ्ङ्। न्यङ्ङग्निः। अग्निश्चेतव्या(३)ः। चेतव्या(३) उत्ताना(३)ः। उत्ताना(३) इति। उत्ताना(३) इत्युत्—ताना(३)ः। इति वयसाम्। वयसाव्ँवै। वा एषः। एष प्रतिमया। प्रतिमया चीयते। प्रतिमयेति प्रति—मया। चीयते यत्। यदग्निः। अग्निर् यत्। यन् न्यञ्चम्। न्यञ्चम् चिनुयात्। चिनुयात् पृष्टितः। पृष्टित एनम्। एनमाहुतयः। आहुतय ऋच्छेयुः। आहुतय इत्या—हुतयः। ऋच्छेयुर् यत्। यदुत्तानम्। उत्तानम् न। उत्तानमित्युत्—तानम्। न पतितुम्। पतितुꣳ शक्नुयात्। शक्नुयादसुवर्ग्यः। असुवर्ग्योऽस्य। असुवर्ग्य

इत्यसुवः—ग्यः। अस्य स्यात्। स्यात् प्राचीनम्। प्राचीनमुत्तानम्। उत्तानम् पुरुषशीर्षम्। उत्तानमित्युत्—तानम्। ॥ [१६] ॥ पुरुषशीर्षमुप। पुरुषशीर्षमिति पुरुष—शीर्षम्। उप दधाति। दधाति मुखतः। मुखत एव। एवैनम्। एनमाहुतयः। आहुतय ऋच्छन्ति। आहुतय इत्या—हुतयः। ऋच्छन्ति न। नोत्तानम्। उत्तानम् चिनुते। उत्तानमित्युत्—तानम्। चिनुते सुवर्ग्यः। सुवर्ग्योऽस्य। सुवर्ग्य इति सुवः—ग्यः। अस्य भवति। भवति सौर्या। सौर्या जुहोति। जुहोति चक्षुः। चक्षुरेव। एवास्मिन्न्। अस्मिन् प्रति। प्रति दधाति। दधाति द्विः। द्विर् जुहोति। जुहोति द्वे। द्वे हि। द्वे इति द्वे। हि चक्षुषी। चक्षुषी समान्या। चक्षुषी इति चक्षुषी। समान्या जुहोति। जुहोति समानम्। समानꣳ हि। हि चक्षुः। चक्षुः समृद्ध्यै। समृद्ध्यै देवासुराः। समृद्ध्या इति सम्—ऋद्ध्यै। देवासुराः सय्ँयत्ताः। देवासुरा इति देव—असुराः। सय्ँयत्ता आसन्न्। सय्ँयत्ता इति सम्—यत्ताः। आसन् ते। ते वामम्। वामव्ँवसु। वसु सम्। सम् नि। न्यदधत। अदधत तत्। तद् देवाः। देवा वामभृता। वामभृताऽवृञ्जत। वामभृतेति वाम—भृता। अवृञ्जत तत्। तद् वामभृतः। वामभृतो वामभृत्त्वम्। वामभृत इति वाम—भृतः। वामभृत्त्वय्ँयत्। वामभृत्त्वमिति वामभृत्—त्वम्। यद् वामभृतम्। वामभृतमुप-दधाति। वामभृतमिति वाम—भृतम्। उपदधाति वामम्। उपदधातीत्युप—दधाति। वाममेव। एव तया। तया वसु। वसु यजमानः। यजमानो भ्रातृव्यस्य। भातृव्यस्य वृङ्क्ते। वृङ्क्ते हिर-ण्यमूद्र्ध्नी। हिरण्यमूद्र्ध्नी भवति। हिरण्यमूद्र्ध्नीति हिरण्य—मूद्र्ध्नी। भवति ज्योतिः। ज्योतिर् वै। वै हिरण्यम्। हिरण्यम् ज्योतिः। ज्योतिर् वामम्। वामम् ज्योतिषा। ज्योतिषैव। एवास्य। अस्य ज्योतिः। ज्योतिर् वामम्। वामव्ँवृङ्क्ते। वृङ्क्ते द्वियजुः। द्वियजुर् भवति। द्वियजुरिति द्वि—यजुः। भवति प्रतिष्ठित्यै। प्रतिष्ठित्या इति प्रति—स्थित्यै॥ ॥ [१७] ॥

(युञ्जानेष्वग्ने प्राचीनमुत्तानम् वामभृतम् चतुर्विंꣳशतिश्च) ॥ ३ ॥

---

आपो वरुणस्य। वरुणस्य पत्नयः। पत्नय आसन्न्। आसन् ताः। ता अग्निः। अग्निरभि। अभ्यद्ध्यायत्। अद्ध्यायत् ताः। ताः सम्। समभवत्। अभवत् तस्य। तस्य रेतः। रेतः परा। पराऽपतत्। अपतत् तत्। तदियम्। इयमभवत्। अभवद् यत्। यद् द्वितीयम्। द्वितीयम्

परापतत्। परापतत् तत्। परापतदिति परा—अपतत्। तदसौ। असावभवत्। अभवदियम्। इयव्वै। वै विराट्। विराडसौ। विराडिति वि—राट्। असौ स्वराट्। स्वराड् यत्। स्वराडिति स्व—राट्। यद् विराजौ। विराजावुपदधाति। विराजाविति वि—राजौ। उपदधातीमे। उपद-धातीत्युप—दधाति। इमे एव। इमे इतीमे। एवोप। उप धत्ते। धत्ते यत्। यद् वै। वा असौ। असौ रेतः। रेतः सिञ्चति। सिञ्चति तत्। तदस्याम्। अस्याम् प्रति। प्रति तिष्ठति। तिष्ठति तत्। तत् प्र। प्र जायते। जायते ताः। ता ओषधयः। ओषधयो वीरुधः। ॥ [१८] ॥ वीरुधो भवन्ति। भवन्ति ताः। ता अग्निः। अग्निरत्ति। अत्ति यः। य एवम्। एवव्वेद। वेद प्र। प्रैव। एव जायते। जायतेऽन्नादः। अन्नादो भवति। अन्नाद इत्यन्न—अदः। भवति यः। यो रेतस्वी। रेतस्वी स्यात्। स्यात् प्रथमायाम्। प्रथमायाम् तस्य। तस्य चित्याम्। चित्यामुभे। उभे उप। उभे इत्युभे। उप दद्ध्यात्। दद्ध्यादिमे। इमे एव। इमे इतीमे। एवास्मै। अस्मै समीची। समीची रेतः। समीची इति समीची। रेतः सिञ्चतः। सिञ्चतो यः। यः सिक्तरेताः। सिक्तरेताः स्यात्। सिक्तरेता इति सिक्त—रेताः। स्यात् प्रथमायाम्। प्रथमायाम् तस्य। तस्य चित्याम्। चित्यामन्याम्। अन्यामुप। उप दद्ध्यात्। दद्ध्यादुत्तमायाम्। उत्तमायामन्याम्। उत्तमाया-मित्युत्—तमायाम्। अन्याꣳ रेतः। रेत एव। एवास्य। अस्य सिक्तम्। सिक्तमाभ्याम्। आभ्या-मुभयतः। उभयतः परि। परि गृह्णाति। गृह्णाति सव्वँथ्सरम्। सव्वँथ्सरम् न। सव्वँथ्सरमिति सम्—वथ्सरम्। न कम्। कम् चन। ॥ [१९] ॥ चन प्रत्यवरोहेत्। प्रत्यवरोहेन् न। प्रत्य-वरोहेदिति प्रति—अवरोहेत्। न हि। हीमे। इमे कम्। इमे इतीमे। कम् चन। चन प्रत्यव-रोहतः। प्रत्यवरोहतस्तत्। प्रत्यवरोहत इति प्रति—अवरोहतः। तदेनयोः। एनयोर् व्रतम्। व्रतय्यँः। यो वै। वा अपशीर्षाणम्। अपशीर्षाणमग्निम्। अपशीर्षाणमित्यप—शीर्षाणम्। अग्निम् चिनुते। चिनुतेऽपशीर्षा। अपशिर्षाऽमुष्मिन्न्। अपशीर्षेत्यप—शीर्षा। अमुष्मिँ-ल्लोँके। लोके भवति। भवति यः। यः सशीर्षाणम्। सशीर्षाणम् चिनुते। सशीर्षाणमिति स—शीर्षाणम्। चिनुते सशीर्षा। सशीर्षाऽमुष्मिन्न्। सशीर्षेति स—शीर्षा। अमुष्मिँ-ल्लोँके। लोके भवति। भवति चित्तिम्। चित्तिम् जुहोमि। जुहोमि मनसा। मनसा घृतेन। घृतेन यथा। यथा देवाः। देवा इह। इहागमन्न्। आगमन् वीतिहोत्राः। आगमन्नित्या—गमन्न्। वीति-

हौत्रा ऋतावृधः। वीतिहौत्रा इति वीति—होत्राः। ऋतावृधः समुद्रस्य। ऋतावृध इत्यृत—वृधः। समुद्रस्य वयुनस्य। वयुनस्य पत्मन्न्। पत्मन् जुहोमि। जुहोमि विश्वकर्मणे। विश्वकर्मणे विश्वा। विश्वकर्मण इति विश्व—कर्मणे। विश्वाऽहा। अहाऽमर्त्यम्। अमर्त्यꣳ हविः। हविरिति। इति स्वयमातृण्णाम्। स्वयमातृण्णामुपधाय। स्वयमातृण्णामिति स्वयम्—आतृण्णाम्। उपधाय जुहोति। उपधायेत्युप—धाय। जुहोत्येतत्। ॥ [२०] ॥ एतद् वै। वा अग्नेः। अग्नेः शिरः। शिरः सशीर्षाणम्। सशीर्षाणमेव। सशीर्षाणमिति स—शीर्षाणम्। एवाग्निम्। अग्निम् चिनुते। चिनुते सशीर्षा। सशीर्षाऽमुष्मिन्न्। सशीर्षेति स—शीर्षा। अमुष्मिँल्लोके। लोके भवति। भवति यः। य एवम्। एवंँवेद। वेद सुवर्गाय। सुवर्गाय वै। सुवर्गायेति सुवः—गाय। वा एषः। एष लोकाय। लोकाय चीयते। चीयते यत्। यदग्निः। अग्निस्तस्य। तस्य यत्। यदयथा-पूर्वम्। अयथापूर्वम् क्रियते। अयथापूर्वमित्ययथा—पूर्वम्। क्रियतेऽसुवर्ग्यम्। असुवर्ग्यमस्य। असुवर्ग्यमित्यसुवः—ग्यम्। अस्य तत्। तथ् सुवर्ग्यः। सुवर्ग्योऽग्निः। सुवर्ग्य इति सुवः—ग्यः। अग्निश्चितिम्। चितिमुपधाय। उपधायाभि। उपधायेत्युप—धाय। अभि मृशेत्। मृशेच् चित्तिम्। चित्तिमचित्तिम्। अचित्तिम् चिनवत्। चिनवद् वि। वि विद्वान्। विद्वान् पृष्ठा। पृष्ठेव। इव वीता। वीता वृजिना। वृजिना च। च मर्तान्। मर्तान् राये। राये च। च नः। नः स्वपत्याय। स्वपत्याय देव। स्वपत्यायेति सु—अपत्याय। देव दितिम्। दितिम् च। च रास्व। रास्वादितिम्। अदितिमुरुष्य। उरुष्येति। इति यथापूर्वम्। यथापूर्वमेव। यथापूर्वमिति यथा—पूर्वम्। एवैनाम्। एनामुप। उप धत्ते। धत्ते प्राञ्चम्। प्राञ्चमेनम्। एनम् चिनुते। चिनुते सुवर्ग्यः। सुवर्ग्योऽस्य। सुवर्ग्य इति सुवः—ग्यः। अस्य भवति। भवतीति भवति॥ ॥ [२१] ॥

(ओषधयः कम् जुहोति स्वपत्याया षाट्दश च) ॥ ४ ॥

विश्वकर्मा दिशाम्। विश्वकर्मेति विश्व—कर्मा। दिशाम् पतिः। पतिः सः। स नः। नः पशून्। पशून् पातु। पातु सः। सोऽस्मान्। अस्मान् पातु। पातु तस्मै। तस्मै नमः। नमः प्रजापतिः। प्रजापती रुद्रः। प्रजापतिरिति प्रजा—पतिः। रुद्रो वरुणः। वरुणोऽग्निः। अग्निर् दिशाम्। दिशाम् पतिः। पतिः सः। स नः। नः पशून्। पशून् पातु। पातु सः। सोऽस्मान्। अस्मान् पातु।

पातु तस्मै᳚। तस्मै नमः᳚। नम॑ एताः। एता वै। वै देवताः᳚। देवता॑ एतेषा᳚म्। एतेषा᳚म् पशूनाम्। पशूनामधि॑पतयः। अधि॑पतय स्ताभ्यः᳚। अधि॑पतय इत्यधि॑—पतयः। ताभ्यो वै। वा एषः। एष आ। आ वृश्च्यते। वृश्च्यते यः। यः प॑शुशीर्॒षाणि॑। पशुशीर्॒षाण्युपदधा॑ति। पशुशीर्॒षाणीति॑ पशु—शीर्॒षाणि॑। उपदधा॑ति हिरण्येष्टकाः। उपदधातीत्यु॑प—दधा॑ति। हिरण्येष्टका उप॑। हिर-ण्येष्टका इति॑ हिरण्य—इष्टकाः। उप॑ दधाति। दधात्येताभ्यः᳚। एताभ्य एव। एव देवताभ्यः᳚। देव-ताभ्यो नमः᳚। नम॑स्करोति। करोति ब्रह्मवादि॑नः। ब्रह्मवादिनो॑ वदन्ति। ब्रह्मवादिन इति॑ ब्रह्म—वादि॑नः। ॥ [२२] ॥ वदन्त्यग्नौ। अग्नौ ग्राम्यान्। ग्राम्यान् पशून्। पशून् प्र। प्र द॑धाति। दधाति शुचा। शुचाऽऽरण्यान्। आरण्यान॑र्पयति। अर्पयति किम्। किम् तत॑ः। तत उत्। उच्छि॑ꣳषति। शि॒ꣳषतीति॑। इति यत्। यद्धि॑रण्येष्टकाः। हिरण्येष्टका उ॑पदधा॑ति। हिरण्येष्टका इति॑ हिरण्य—इष्टकाः। उपदधा᳚त्यमृत᳚म्। उपदधातीत्यु॑प—दधा॑ति। अमृत᳚ᳶवै। वै हि॑रण्यम्। हि॑रण्यममृते॑न। अमृते॑नैव। एव ग्राम्येभ्यः᳚। ग्राम्येभ्यः॑ पशुभ्यः॑। पशुभ्यो॑ भेषजम्। पशुभ्य इति॑ पशु—भ्यः। भेषजम् क॑रोति। करोति न। नैना॑न्। एनान्हिनस्ति। हिनस्ति प्राणः। प्राणो वै। प्राण इति॑ प्र—अनः। वै प्र॑थमा। प्रथमा स्व॑यमातृण्णा। स्वयमातृण्णा व्यानः। स्वयमातृण्णेति॑ स्वयम्—आतृण्णा। व्यानो द्विती॑या᳚। व्यान इति॑ वि—अनः। द्विती॑याऽपानः। अपान स्तृतीया᳚। अपान इत्य॑प—अनः। तृतीयाऽनु। अनु प्र। प्राण्या᳚त्। अन्यात् प्रथमाम्। प्रथमाꣳ स्व॑यमा-तृण्णाम्। स्वयमातृण्णामु॑पधाय॑। स्वयमातृण्णामिति॑ स्वयम्—आतृण्णाम्। उपधाय॑ प्राणेन॑। उपधायेत्यु॑प—धाय॑। प्राणेनैव। प्राणेनेति॑ प्र—अनेन॑। एव प्राणम्। प्राणꣳ सम्। प्राणमिति॑ प्र—अनम्। सम॑र्द्धयति। अर्द्धयति वि। व्य॑न्यात्। अन्याद् द्विती॑याम्। ॥ [२३] ॥ द्विती-यामुपधाय॑। उपधाय॑ व्यानेन॑। उपधायेत्यु॑प—धाय॑। व्यानेनैव। व्यानेनेति॑ वि—अनेन॑। एव व्यानम्। व्यानꣳ सम्। व्यानमिति॑ वि—अनम्। सम॑र्द्धयति। अर्द्धयत्यप॑। अपा᳚न्यात्। अन्यात् तृतीया᳚म्। तृतीया॑मुपधाय॑। उपधाया॑पानेन॑। उपधायेत्यु॑प—धाय॑। अपानेनैव। अपानेनेत्य॑प—अनेन॑। एवापानम्। अपानꣳ सम्। अपानमित्य॑प—अनम्। सम॑र्द्धयति। अर्द्धयत्यथो᳚। अथो᳚ प्राणैः। अथो इत्यथो᳚। प्राणैरेव। प्राणैरिति॑ प्र—अनैः। एवैन᳚म्। एनꣳ सम्। समि॑न्धे। इन्धे भूः। भूर्भुव॑ः। भुवः सुवः॑। सुवरिति॑। इति॑ स्वयमातृण्णाः। स्वयमातृण्णा उप॑। स्वयमातृण्णा

इति स्वयम्—आतृण्णाः। उप दधाति। दधातीमे। इमे वै। वै लोकाः। लोकाः स्वयमातृण्णाः। स्वयमातृण्णा एताभिः। स्वयमातृण्णा इति स्वयम्—आतृण्णाः। एताभिः खलु। खलु वै। वै व्याहृतीभिः। व्याहृतीभिः प्रजापतिः। व्याहृतीभिरिति व्याहृति—भिः। प्रजापतिः प्र। प्रजापतिरिति प्रजा—पतिः। प्राजायत। अजायत यत्। यदेताभिः। एताभिर् व्याहृतीभिः। व्याहृतीभिः स्वयमातृण्णाः। व्याहृतीभिरिति व्याहृति—भिः। स्वयमातृण्णा उपदधाति। स्वयमातृण्णा इति स्वयम्—आतृण्णाः। उपदधातीमान्। उपदधातीत्युप—दधाति। इमानेव। एव लोकान्। लोकानुपधाय। उपधायैषु। उपधायेत्युप—धाय। एषु लोकेषु। ॥ [२४] ॥ लोकेष्वधि। अधि प्र। प्र जायते। जायते प्राणाय। प्राणाय व्यानाय। प्राणायेति प्र—अनाय। व्यानायापानाय। व्यानायेति वि—अनाय। अपानाय वाचे। अपानायेत्यप—अनाय। वाचे त्वा। त्वा चक्षुषे। चक्षुषे त्वा। त्वा तया। तया देवतया। देवतयाऽङ्गिरस्वत्। अङ्गिरस्वद् ध्रुवा। ध्रुवा सीद। सीदाग्निना। अग्निना वै। वै देवाः। देवाः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमजिगाꣳसन्न्। अजिगाꣳसन् तेन। तेन पतितुम्। पतितुम् न। नाशक्नुवन्न्। अशक्नुवन् ते। त एताः। एताश्चतस्रः। चतस्रः स्वयमातृण्णाः। स्वयमातृण्णा अपश्यन्न्। स्वयमातृण्णा इति स्वयम्—आतृण्णाः। अपश्यन् ताः। ता दिक्षु। दिक्षूप। उपादधत। अदधत तेन। तेन सर्वतश्चक्षुषा। सर्वतश्चक्षुषा सुवर्गम्। सर्वतश्चक्षुषेति सर्वतः—चक्षुषा। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन्यत्। यच् चतस्रः। चतस्रः स्वयमातृण्णाः। स्वयमातृण्णा दिक्षु। स्वयमातृण्णा इति स्वयम्—आतृण्णाः। दिक्षूपदधाति। उपदधाति सर्वतश्चक्षुषा। उपदधातीत्युप दधाति। सर्वतश्चक्षुषैव। सर्वतश्चक्षुषेति सर्वतः—चक्षुषा। एव तत्। तदग्निना। अग्निना यजमानः। यजमानः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमेति। एतीत्येति॥ ॥ [२५] ॥

(ब्रह्मवादिनो व्यन्या देषु यजमान स्त्रीणि च) ॥ ५ ॥

अग्न आ। आ याहि। याहि वीतये। वीतय इति। इत्याह। आहाहृत। अहृतैव। एवैनम्। एनमग्निम्। अग्निम् दूतम्। दूतँवृणीमहे। वृणीमह इति। इत्याह। आह हूत्वा। हूत्वैव। एवैनम्।

एनम् वृणीते। वृणीतेऽग्निना। अग्निनाऽग्निः। अग्निः सम्। समिध्यते। इध्यत इति। इत्याह। आह सम्। समिन्धे। इन्ध एव। एवैनम्। एनमग्निः। अग्निर् वृत्राणि। वृत्राणि जङ्घनत्। जङ्घनदिति। इत्याह। आह समिद्धे। समिद्ध एव। समिद्ध इति सम्—इद्धे। एवास्मिन्न्। अस्मिन्निन्द्रियम्। इन्द्रियम् दधाति। दधात्यग्नेः। अग्नेः स्तोमम्। स्तोमम् मनामहे। मनामह इति। इत्याह। आह मनुते। मनुत एव। एवैनम्। एनमेतानि। एतानि वै। वा अह्नाम्। अह्नाꣳ रूपाणि। रूपाण्यन्वहम्। ॥ [२६] ॥ अन्वहमेव। अन्वहमित्यनु—अहम्। एवैनम्। एनम् चिनुते। चिनुतेऽव। अवाह्नाम्। अह्नाꣳ रूपाणि। रूपाणि रुन्धे। रुन्धे ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति कस्मात्। कस्माथ् सत्यात्। सत्याद् यातयाम्नीः। यातयाम्नीरन्याः। यातयाम्नीरिति यात—याम्नीः। अन्या इष्टकाः। इष्टका अयातयाम्नी। अयातयाम्नी लोकम्पृणा। अयातयाम्नीत्ययात—याम्नी। लोकम्पृणेति। लोकम्पृणेति लोकम्—पृणा। इत्यैन्द्राग्नी। ऐन्द्राग्नी हि। ऐन्द्राग्नीत्यैन्द्र—अग्नी। हि बार्हस्पत्या। बार्हस्पत्येति। इति ब्रूयात्। ब्रूयादिन्द्राग्नी। इन्द्राग्नी च। इन्द्राग्नी इतीन्द्र—अग्नी। च हि। हि देवानाम्। देवानाम् बृहस्पतिः। बृहस्पतिश्च। चायातयामानः। अयातयामानोऽनुचरवती। अयातयामान इत्ययात—यामानः। अनुचरवती भवति। अनुचरवतीत्यनुचर—वती। भवत्यजामित्वाय। अजामित्वायानुष्टुभा। अजामित्वायेत्यजामि—त्वाय। अनुष्टुभाऽनु। अनुष्टुभेत्यनु—स्तुभा। अनु चरति। चरत्यात्मा। आत्मा वै। वै लोकम्पृणा। लोकम्पृणा प्राणः। लोकम्पृणेति लोकम्—पृणा। प्राणोऽनुष्टुप्। प्राण इति प्र—अनः। अनुष्टुप् तस्मात्। अनुष्टुबित्यनु—स्तुप्। तस्मात् प्राणः। प्राणः सर्वाणि। प्राण इति प्र—अनः। सर्वाण्यङ्गानि। अङ्गान्यनु। अनु चरति। चरति ताः। ता अस्य। अस्य सूददोहसः। सूददोहस इति। सूददोहस इति सूद—दोहसः। ॥ [२७] ॥ इत्याह। आह तस्मात्। तस्मात् परुषिपरुषि। परुषिपरुषि रसः। परुषिपरुषीति परुषि—परुषि। रसः सोमम्। सोमꣴ श्रीणन्ति। श्रीणन्ति पृश्ञयः। पृश्ञय इति। इत्याह। आहान्नम्। अन्नँवै। वै पृश्ञि। पृश्ञ्यन्नम्। अन्नमेव। एवाव। अव रुन्धे। रुन्धेऽर्कः। अर्को वै। वा अग्निः। अग्निरर्कः। अर्कोऽन्नम्। अन्नमन्नम्। अन्नमेव। एवाव। अव रुन्धे। रुन्धे जन्मन्न्। जन्मन् देवानाम्। देवानाँविशः। विशस्त्रिषु। त्रिष्वा। आ रोचने। रोचने दिवः।

दि॒व इति॑। इत्या॑ह। आ॒हे॒मान्। इ॒माने॒व। ए॒वास्मै᳚। अ॒स्मै लो॒कान्। लो॒कान् ज्योति॑ष्मतः। ज्योति॑ष्मतः करोति। क॒रोति॒ यः। यो वै। वा इष्ट॑कानाम्। इष्ट॑कानाम् प्रति॒ष्ठाम्। प्र॒ति॒ष्ठाँव्वेद॑। प्र॒ति॒ष्ठामिति॑ प्रति—स्थाम्। वेद॒ प्रति॑। प्रत्ये॒व। ए॒व ति॑ष्ठति। ति॒ष्ठ॒ति॒ तया᳚। तया॑ दे॒वत॑या। दे॒व-त॑याऽङ्गिर॒स्वत्। अ॒ङ्गि॒र॒स्वद् ध्रु॒वा। ध्रु॒वा सी॑द। सी॒देति॑। इत्या॑ह। आ॒हैषा। ए॒षा वै। वा इष्ट॑कानाम्। इष्ट॑कानाम् प्रति॒ष्ठा। प्र॒ति॒ष्ठा यः। प्र॒ति॒ष्ठेति॑ प्रति—स्था। य ए॒वम्। ए॒वँव्वेद॑। वेद॒ प्रति॑। प्रत्ये॒व। ए॒व ति॑ष्ठति। ति॒ष्ठ॒तीति॑ तिष्ठति॥ ॥ [२८] ॥

(रू॒पाणि॑ सू॒द्दोह॒स् स्तया॒ षोड॑श च) ॥ ६ ॥

सु॒व॒र्गाय॒ वै। सु॒व॒र्गायेति॑ सुवः—गाय॑। वा ए॒षः। ए॒ष लो॒काय॑। लो॒काय॑ चीयते। ची॒य॒ते यत्। यद॒ग्निः। अ॒ग्निर् वज्रः॑। वज्र॑ एकाद॒शिनी᳚। ए॒का॒द॒शि॒नी यत्। यद॒ग्नौ। अ॒ग्नावे॑काद॒शिनी᳚म्। ए॒का॒द॒शिनी᳚म् मिनु॒यात्। मि॒नु॒याद् वज्रे॑ण। वज्रे॑णैनम्। ए॒न॒ꣳ॒ सु॒व॒र्गात्। सु॒व॒र्गाल्लो॒कात्। सु॒व-र्गादिति॑ सुवः—गात्। लो॒काद॒न्तः। अ॒न्तर् द॑ध्यात्। द॒ध्याद् यत्। यन् न। न मि॑नु॒यात्। मि॒नु॒याथ् स्वरु॑भिः। स्वरु॑भिः प॒शून्। स्वरु॑भि॒रिति॒ स्वरु—भिः। प॒शून्वि। व्य॑र्द्धयेत्। अ॒र्द्ध॒-ये॒दे॒कयू॒पम्। ए॒क॒यू॒पम् मि॑नोति। ए॒क॒यू॒पमित्ये॑क—यूपम्। मि॒नो॒ति॒ न। नैन॑म्। ए॒न॒ँव्वज्रे॑ण। वज्रे॑ण सुव॒र्गात्। सु॒व॒र्गाल्लो॒कात्। सु॒व॒र्गादिति॑ सुवः—गात्। लो॒काद॒न्तर्द॑धाति। अ॒न्त॒र्द॑धा॒ति॒ न। अ॒न्त॒र्द॒धा॒तीत्य॒न्तः—द॒धाति। न स्वरु॑भिः। स्वरु॑भिः प॒शून्। स्वरु॑भि॒रिति॒ स्वरु—भिः। प॒शून्वि। व्य॑र्द्धयति। अ॒र्द्धय॑ति॒ वि। वि वै। वा ए॒षः। ए॒ष इ॑न्द्रि॒येण॑। इ॒न्द्रि॒येण॑ वी॒र्ये᳚ण। वी॒र्ये᳚-णर्द्ध्य॑ते। ऋ॒द्ध्य॒ते॒ यः। यो᳚ऽग्निम्। अ॒ग्निम् चि॒न्वन्न्। चि॒न्वन्न॑धि॒क्राम॑ति। अ॒धि॒क्राम॑त्यैन्द्रि॒या। अ॒धि॒क्रा॒म॒तीत्य॑धि—क्राम॑ति। ऐ॒न्द्रि॒यर्चा। ॥ [२९] ॥ ऋ॒चाऽऽक्रम॑णम्। आ॒क्रम॑णम् प्रति॑। आ॒क्रम॑णमित्या᳚—क्रम॑णम्। प्रतीष्ट॑काम्। इष्ट॑का॒मुप॑। उप॑ द॒ध्यात्। द॒ध्या॒न् न। नेन्द्रि॒येण॑। इ॒न्द्रि॒येण॑ वी॒र्ये᳚ण। वी॒र्ये᳚ण वि। व्यृ॑द्ध्यते। ऋ॒द्ध्य॒ते॒ रु॒द्रः। रु॒द्रो वै। वा ए॒षः। ए॒ष यत्। यद॒ग्निः। अ॒ग्निस्तस्य॑। तस्य॑ ति॒स्रः। ति॒स्रः श॑र॒व्या᳚ः। श॒र॒व्या᳚ः प्र॒तीची᳚। प्र॒तीची॑ ति॒रश्ची᳚। ति॒र॒श्च्य॒-नूची᳚। अ॒नू॒ची॒ ताभ्य॑ः। ताभ्यो॒ वै। वा ए॒षः। ए॒ष आ। आ वृ॑श्च्यते। वृ॒श्च्य॒ते॒ यः। यो᳚ऽग्निम्। अ॒ग्निम् चि॑नु॒ते। चि॒नु॒ते᳚ऽग्निम्। अ॒ग्निम् चि॒त्वा। चि॒त्वा ति॑सृ॒धन्वम्। ति॒सृ॒ध॒न्वमया॑चितम्।

तिसृधन्वमिति तिसृ—धन्वम्। अयाचितम् ब्राह्मणाय। ब्राह्मणाय दद्यात्। दद्यात् ताभ्यः। ताभ्य एव। एव नमः। नमस्करोति। करोत्यथो। अथो ताभ्यः। अथो इत्यथो। ताभ्य एव। एवात्मानम्। आत्मानम् निः। निष्क्रीणीते। क्रीणीते यत्। यत् ते। ते रुद्र। रुद्र पुरः। पुरो धनुः। ॥ [३०] ॥ धनुस्तत्। तद् वातः। वातो अनु। अनु वातु। वातु ते। ते तस्मै। तस्मै ते। ते रुद्र। रुद्र सँव्वथ्सरेण। सँव्वथ्सरेण नमः। सँव्वथ्सरेणेति सम्—वथ्सरेण। नमस्करोमि। करोमि यत्। यत् ते। ते रुद्र। रुद्र दक्षिणा। दक्षिणा धनुः। धनुस्तत्। तद् वातः। वातो अनु। अनु वातु। वातु ते। ते तस्मै। तस्मै ते। ते रुद्र। रुद्र परिवथ्सरेण। परिवथ्सरेण नमः। परिवथ्सरेणेति परि—वथ्सरेण। नमस्करोमि। करोमि यत्। यत् ते। ते रुद्र। रुद्र पश्चात्। पश्चाद् धनुः। धनुस्तत्। तद् वातः। वातो अनु। अनु वातु। वातु ते। ते तस्मै। तस्मै ते। ते रुद्र। रुद्रेदावथ्सरेण। इदावथ्सरेण नमः। नमस्करोमि। करोमि यत्। यत् ते। ते रुद्र। रुद्रोत्तरात्। उत्तराद् धनुः। उत्तरादित्युत्—तरात्। धनु स्तत्। तद् वातः। ॥ [३१] ॥ वातो अनु। अनु वातु। वातु ते। ते तस्मै। तस्मै ते। ते रुद्र। रुद्रेदुवथ्सरेण। इदुवथ्सरेण नमः। इदुवथ्सरेणेतीदु—वथ्सरेण। नमस्करोमि। करोमि यत्। यत् ते। ते रुद्र। रुद्रोपरि। उपरि धनुः। धनुस्तत्। तद् वातः। वातो अनु। अनु वातु। वातु ते। ते तस्मै। तस्मै ते। ते रुद्र। रुद्र वथ्सरेण। वथ्सरेण नमः। नमस्करोमि। करोमि रुद्रः। रुद्रो वै। वा एषः। एष यत्। यदग्निः। अग्निः सः। स यथा। यथा व्याघ्रः। व्याघ्रः क्रुद्धः। क्रुद्धस्तिष्ठति। तिष्ठत्येवम्। एवव्वै। वा एषः। एष एतर्हि। एतर्हि सञ्चितम्। सञ्चितमेतैः। सञ्चितमिति सम्—चितम्। एतैरुप। उप तिष्ठते। तिष्ठते नमस्कारैः। नमस्कारैरेव। नमस्कारैरिति नमः—कारैः। एवैनम्। एनꣳ शम-यति। शमयति ये। येऽग्नयः। अग्नयः पुरीष्याः। ॥ [३२] ॥ पुरीष्याः प्रविष्टाः। प्रविष्टाः पृथिवीम्। प्रविष्टा इति प्र—विष्टाः। पृथिवीमनु। अन्वित्यनु॥ तेषाम् त्वम्। त्वमसि। अस्यु-त्तमः। उत्तमः प्र। उत्तम इत्युत्—तमः। प्र णः। नो जीवातवे। जीवातवे सुव। सुवेति सुव॥ आपम् त्वा। त्वाऽग्ने। अग्ने मनसा। मनसाऽऽपम्। आपम् त्वा। त्वाऽग्ने। अग्ने तपसा। तप-साऽऽपम्। आपम् त्वा। त्वाऽग्ने। अग्ने दीक्षया। दीक्षयाऽऽपम्। आपम् त्वा। त्वाऽग्ने। अग्न उपसद्भिः। उपसद्भिरापम्। उपसद्भिरित्युपसत्—भिः। आपम् त्वा। त्वाऽग्ने। अग्ने सुत्यया।

सुत्ययाऽऽपम्। आपम् त्वा। त्वाऽग्ने। अग्ने दक्षिणाभिः। दक्षिणाभिरापम्। आपम् त्वा। त्वाऽग्ने। अग्नेऽवभृथेन। अवभृथेनाऽऽपम्। अवभृथेनेत्यव—भृथेन। आपम् त्वा। त्वाऽग्ने। अग्ने वशया। वशयाऽऽपम्। आपम् त्वा। त्वाऽग्ने। अग्ने स्वगाकारेण। स्वगाकारेणेति। स्वगाकारेणेति स्वगा—कारेण। इत्याह। आहैषा। एषा वै। वा अग्नेः। अग्नेराप्तिः। आप्तिस्तया। तयैव। एवैनम्। एनमाप्नोति। आप्नोतीत्याप्नोति॥ ॥ [३३] ॥

(ऐन्द्रिया पुर उत्तराद्धनुस्त दग्नय आहा ष्टौ च) ॥ ७ ॥

गायत्रेण पुरस्तात्। पुरस्तादुप। उप तिष्ठते। तिष्ठते प्राणम्। प्राणमेव। प्राणमिति प्र—अनम्। एवास्मिन्न्। अस्मिन् दधाति। दधाति बृहद्रथन्तराभ्याम्। बृहद्रथन्तराभ्याम् पक्षौ। बृहद्रन्तराभ्यामिति बृहत्—रथन्तराभ्याम्। पक्षावोजः। ओज एव। एवास्मिन्न्। अस्मिन् दधाति। दधात्यृतुस्थायज्ञायज्ञियेन। ऋतुस्थायज्ञायज्ञियेन पुच्छम्। पुच्छमृतुषु। ऋतुष्वेव। एव प्रति। प्रति तिष्ठति। तिष्ठति पृष्ठैः। पृष्ठैरुप। उप तिष्ठते। तिष्ठते तेजः। तेजो वै। वै पृष्ठानि। पृष्ठानि तेजः। तेज एव। एवास्मिन्न्। अस्मिन् दधाति। दधाति प्रजापतिः। प्रजापतिरग्निम्। प्रजापतिरिति प्रजा—पतिः। अग्निमसृजत। असृजत सः। सोऽस्मात्। अस्माथ् सृष्टः। सृष्टः पराङ्। पराङैत्। ऐत् तम्। तँव्वारवन्तीयेन। वारवन्तीयेनावारयत। वारवन्तीयेनेति वार—वन्तीयेन। अवारयत तत्। तद् वारवन्तीयस्य। वारवन्तीयस्य वारवन्तीयत्वम्। वारवन्तीयस्येति वार—वन्तीयस्य। वारवन्तीयत्वꣳ श्यैतेन। वारवन्तीयत्वमिति वारवन्तीय—त्वम्। श्यैतेन श्येती। श्येती अकुरुत। अकुरुत तत्। तच्छ्यैतस्य। श्यैतस्य शैतत्वम्। श्यैतत्वय्ँयत्। श्यैतत्वमिति श्यैत—त्वम्। ॥ [३४] ॥ यद् वारवन्तियेन। वारवन्तीयेनोपतिष्ठते। वारवन्तीयेनेति वार—वन्तियेन। उपतिष्ठते वारयते। उपतिष्ठत इत्युप—तिष्ठते। वारयत एव। एवैनम्। एनꣳ श्यैतेन। श्यैतेन श्येती। श्येती कुरुते। कुरुते प्रजापतेर्हृदयेन। प्रजापतेर्हृदयेनापिपक्षम्। अपिपक्षम् प्रति। अपिपक्षमित्यपि—पक्षम्। प्रत्युप। उप तिष्ठते। तिष्ठते प्रेमाणम्। प्रेमाणमेव। एवास्य। अस्य गच्छति। गच्छति प्राच्या। प्राच्या त्वा। त्वा दिशा। दिशा सादयामि। सादयामि गायत्रेण। गायत्रेण छन्दसा। छन्दसाऽग्निना।

अ॒ग्निना॑ दे॒वत॑या। दे॒वत॑याऽग्नेः। अ॒ग्नेः शी॒र्ष्णा। शी॒र्ष्णाऽग्नेः। अ॒ग्नेः शिरः॑। शिर॒ उप॑। उप॑ दधामि। द॒धा॒मि॒ दक्षि॑णया। दक्षि॑णया त्वा। त्वा॒ दि॒शा। दि॒शा सा॑दयामि। सा॒द॒या॒मि॒ त्रैष्टु॑भेन। त्रैष्टु॑भेन॒ छन्द॑सा। छन्द॒सेन्द्रे॑ण। इन्द्रे॑ण दे॒वत॑या। दे॒वत॑याऽग्नेः। अ॒ग्नेः प॒क्षेण॑। प॒क्षेणा॒ग्नेः। अ॒ग्नेः प॒क्षम्। प॒क्षमुप॑। उप॑ दधामि। द॒धा॒मि॒ प्र॒तीच्या॑। प्र॒तीच्या॑ त्वा। त्वा॒ दि॒शा। दि॒शा सा॑दयामि। सा॒द॒या॒मि॒ जाग॑तेन। ॥ [३५] ॥ जाग॑तेन॒ छन्द॑सा। छन्द॑सा सवि॒त्रा। स॒वि॒त्रा दे॒वत॑या। दे॒वत॑याऽग्नेः। अ॒ग्नेः पुच्छे॑न। पुच्छे॑ना॒ग्नेः। अ॒ग्नेः पुच्छ॑म्। पुच्छ॒मुप॑। उप॑ दधामि। द॒धा॒म्यु॒दीच्या॑। उ॒दीच्या॑ त्वा। त्वा॒ दि॒शा। दि॒शा सा॑दयामि। सा॒द॒या॒म्यानु॑ष्टुभेन। आनु॑ष्टुभेन॒ छन्द॑सा। आनु॑ष्टभे॒नेत्यानु॑—स्तु॒भे॒न॒। छन्द॑सा मि॒त्रावरु॑णाभ्याम्। मि॒त्रावरु॑णाभ्याम् दे॒वत॑या। मि॒त्रावरु॑णाभ्या॒मिति॑ मि॒त्रा—वरु॑णाभ्याम्। दे॒वत॑याऽग्नेः। अ॒ग्नेः प॒क्षेण॑। प॒क्षेणा॒ग्नेः। अ॒ग्नेः प॒क्षम्। प॒क्षमुप॑। उप॑ दधामि। द॒धा॒म्यू॒र्ध्वया॑। ऊ॒र्ध्वया॑ त्वा। त्वा॒ दि॒शा। दि॒शा सा॑दयामि। सा॒द॒या॒मि॒ पाङ्क्ते॑न। पाङ्क्ते॑न॒ छन्द॑सा। छन्द॑सा॒ बृह॒स्पति॑ना। बृह॒स्पति॑ना दे॒वत॑या। दे॒वत॑याऽग्नेः। अ॒ग्नेः पृ॒ष्ठेन॑। पृ॒ष्ठेना॒ग्नेः। अ॒ग्नेः पृ॒ष्ठम्। पृ॒ष्ठमुप॑। उप॑ दधामि। द॒धा॒मि॒ यः। यो वै। वा अपा॑त्मानम्। अपा॑त्मानम॒ग्निम्। अपा॑त्मान॒मित्यप॑—आ॒त्मा॒न॒म्। अ॒ग्निम् चि॑नुते। चि॒नु॒तेऽपा॑त्मा। अपा॑त्मा॒ऽमुष्मि॑न्न्। अपा॒त्मेत्यप॑—आ॒त्मा॒। अ॒मुष्मि॑ँल्लो॒के। लो॒के भ॑वति। भ॒व॒ति॒ यः। यः सात्मा॑नम्। सात्मा॑नम् चिनु॒ते। सात्मा॑न॒मिति॒ स—आ॒त्मा॒न॒म्। चि॒नु॒ते सात्मा॑। सात्मा॒ऽमुष्मि॑न्न्। सात्मेति॒ स—आ॒त्मा॒। अ॒मुष्मि॑ँल्लो॒के। लो॒के भ॑वति। भ॒व॒त्या॒त्मेष्ट॑काः। आ॒त्मेष्ट॑का उप॑। आ॒त्मेष्ट॑का इत्या॑त्म—इ॒ष्ट॒काः। उप॑ दधाति। द॒धा॒त्ये॒षः। ए॒ष वै। वा अ॒ग्नेः। अ॒ग्नेरा॒त्मा। आ॒त्मा सात्मा॑नम्। सात्मा॑नमे॒व। सात्मा॑न॒मिति॒ स—आ॒त्मा॒न॒म्। ए॒वाग्निम्। अ॒ग्निम् चि॑नुते। चि॒नु॒ते सात्मा॑। सात्मा॒ऽमुष्मि॑न्न्। सात्मेति॒ स—आ॒त्मा॒। अ॒मुष्मि॑ँल्लो॒के। लो॒के भ॑वति। भ॒व॒ति॒ यः। य ए॒वम्। ए॒वँव्वेद॑। वेदे॒ति॒ वेद॑॥ ॥ [३६] ॥

(श्यै॒तत्वम् प्र॒तीच्या॑ त्वा दि॒शा सा॑दयामि॒ यः सात्मा॑नम् चिनु॒ते द्वावि॑ꣳशतिश्च) ॥ ८ ॥

---

अग्न॑ उदधे। उ॒द॒धे॒ या। उ॒द॒ध॒ इत्यु॑द—धे॒। या ते॑। त॒ इषुः॑। इषु॑र्॒ यु॒वा। यु॒वा नाम॑। नाम॒ तया॑। तया॑ नः। नो॒ मृ॒ड। मृ॒ड तस्याः॑। तस्या॑स्ते। ते॒ नमः॑। नम॒स्तस्याः॑। तस्या॑स्ते। त॒

उप। उप जीवन्तः। जीवन्तो भूयास्म। भूयास्माग्ने। अग्ने दुद्ध्र। दुद्ध्र गह्य। गह्य किꣳशिल।
किꣳशिल वन्य। वन्य या। या ते। त इषुः। इषुर् युवा। युवा नाम। नाम तया। तया नः।
नो मृड। मृड तस्याः। तस्यास्ते। ते नमः। नमस्तस्याः। तस्यास्ते। त उप। उप जीवन्तः।
जीवन्तो भूयास्म। भूयास्म पञ्च। पञ्च वै। वा एते। एतेऽग्नयः। अग्नयो यत्। यच् चितयः।
चितय उद्धिः। उद्धिरेव। उद्धिरित्युद्—धिः। एव नाम। नाम प्रथमः। प्रथमो दुद्ध्रः।
दुद्ध्रो द्वितीयः। ॥ [३७] ॥ द्वितीयो गह्यः। गह्यस्तृतीयः। तृतीयः किꣳशिलः। किꣳशि-
लश्चतुर्थः। चतुर्थो वन्यः। वन्यः पञ्चमः। पञ्चमस्तेभ्यः। तेभ्यो यत्। यदाहुतीः। आहुतीर्
न। आहुतीरित्या—हुतीः। न जुहुयात्। जुहुयादद्ध्वर्युम्। अद्ध्वर्युम् च। च यजमानम्।
यजमानम् च। च प्र। प्र दहेयुः। दहेयुर् यत्। यदेताः। एता आहुतीः। आहुतीर् जुहोति।
आहुतीरित्या—हुतीः। जुहोति भागधेयेन। भागधेयेनैव। भागधेयेनेति भाग—धेयेन। एवैनान्।
एनाञ्छमयति। शमयति न। नार्तिम्। आर्तिमा। आर्च्छति। ऋच्छत्यद्ध्वर्युः। अद्ध्वर्युर्
न। न यजमानः। यजमानो वाक्। वाङ् मे। म आसन्न्। आसन् नसोः। नसोः प्राणः।
प्राणोऽक्ष्योः। प्राण इति प्र—अनः। अक्ष्योश्चक्षुः। चक्षुः कर्णयोः। कर्णयोः श्रोत्रम्।
श्रोत्रम् बाहुवोः। बाहुवोर् बलम्। बलमूरुवोः। ऊरुवोरोजः। ओजोऽरिष्टा। अरिष्टा विश्वानि।
विश्वान्यङ्गानि। अङ्गानि तनूः। तनूस्तनुवा। ॥ [३८] ॥ तनुवा मे। मे सह। सह नमः।
नमस्ते। ते अस्तु। अस्तु मा। मा मा। मा हिꣳसीः। हिꣳसीरप। अप वै। वा एतस्मात्।
एतस्मात् प्राणाः। प्राणाः क्रामन्ति। प्राणा इति प्र—अनाः। क्रामन्ति यः। योऽग्निम्। अग्निम्
चिन्वन्न्। चिन्वन्नधिक्रामति। अधिक्रामति वाक्। अधिक्रामतीत्यधि—क्रामति। वाङ् मे। म
आसन्न्। आसन् नसोः। नसोः प्राणः। प्राण इति। प्राण इति प्र—अनः। इत्याह। आह प्राणान्।
प्राणानेव। प्राणानिति प्र—अनान्। एवात्मन्न्। आत्मन् धत्ते। धत्ते यः। यो रुद्रः। रुद्रो अग्नौ।
अग्नौ यः। यो अप्सु। अप्सु यः। अप्स्वित्यप्—सु। य ओषधीषु। ओषधीषु यः। यो रुद्रः।
रुद्रो विश्वा। विश्वा भुवना। भुवनाऽऽविवेश। आविवेश तस्मै। आविवेशेत्या—विवेश। तस्मै
रुद्राय। रुद्राय नमः। नमो अस्तु। अस्त्वाहुतिभागाः। आहुतिभागा वै। आहुतिभागा इत्या-
हुति—भागः। वा अन्ये। अन्ये रुद्राः। रुद्रा हविर्भागाः। हविर्भागा अन्ये। हविर्भागा इति

हविः—भागाः। ॥ [३९] ॥ अन्ये शतरुद्रीयम्। शतरुद्रीयꣳ हुत्वा। शतरुद्रीयमिति शत—रुद्रीयम्। हुत्वा गावीधुकम्। गावीधुकम् चरुम्। चरुमेतेन। एतेन यजुषा। यजुषा चरमायाम्। चरमायामिष्टकायाम्। इष्टकायाम् नि। नि दद्ध्यात्। दद्ध्याद् भागधेयेन। भागधेयेनैव। भाग-धेयेनेति भाग—धेयेन। एवैनम्। एनꣳ शमयति। शमयति तस्य। तस्य तु। त्वै। वै शतरु-द्रीयम्। शतरुद्रीयꣳ हुतम्। शतरुद्रीयमिति शत—रुद्रीयम्। हुतमिति। इत्याहुः। आहुर्यस्य। यस्यैतत्। एतदग्नौ। अग्नौ क्रियते। क्रियत इति। इति वसवः। वसवस्त्वा। त्वा रुद्रैः। रुद्रैः पुरस्तात्। पुरस्तात् पान्तु। पान्तु पितरः। पितरस्त्वा। त्वा यमराजानः। यमराजानः पितृभिः। यमराजान इति यम—राजानः। पितृभिर् दक्षिणतः। पितृभिरिति पितृ—भिः। दक्षिणतः पान्तु। पान्त्वादित्याः। आदित्यास्त्वा। त्वा विश्वैः। विश्वैर् देवैः। देवैः पश्चात्। पश्चात् पान्तु। पान्तु द्युतानः। द्युतानस्त्वा। त्वा मारुतः। मारुतो मरुद्भिः। मरुद्भिरुत्तरतः। मरुद्भिरिति मरुत्—भिः। उत्तरतः पातु। उत्तरत इत्युत्—तरतः। पातु देवाः। ॥ [४०] ॥ देवास्त्वा। त्वेन्द्रज्येष्ठाः। इन्द्रज्येष्ठा वरुणराजानः। इन्द्रज्येष्ठा इतीन्द्र—ज्येष्ठाः। वरुणराजानोऽधस्तात्। वरुणराजान इति वरुण—राजानः। अधस्ताच् च। चोपरिष्टात्। उपरिष्टाच् च। च पान्तु। पान्तु न। न वै। वा एतेन। एतेन पूतः। पूतो न। न मेद्ध्यः। मेद्ध्यो न। न प्रोक्षितः। प्रोक्षितो यत्। प्रोक्षित इति प्र—उक्षितः। यदेनम्। एनमतः। अतः प्राचीनम्। प्राचीनम् प्रोक्षति। प्रोक्षति यत्। प्रोक्षतीति प्र—उक्षति। यथ् सञ्चितम्। सञ्चितमाज्येन। सञ्चितमिति सम्—चितम्। आज्येन प्रोक्षति। प्रोक्षति तेन। प्रोक्षतीति प्र—उक्षति। तेन पूतः। पूतस्तेन। तेन मेद्ध्यः। मेद्ध्यस्तेन। तेन प्रोक्षितः। प्रोक्षित इति प्र—उक्षितः॥ ॥ [४१] ॥

(दुघ्र स्तनू हविर्भागाः पातु द्वात्रिꣳशच्च) ॥ ९ ॥

समीची नाम। नामासि। असि प्राची। प्राची दिक्। दिक् तस्याः। तस्यास्ते। तेऽग्निः। अग्निरधिपतिः। अधिपतिरसितः। अधिपतिरित्यधि—पतिः। असितो रक्षिता। रक्षिता यः। यश्च। चाधिपतिः। अधिपतिर् यः। अधिपतिरित्यधि—पतिः। यश्च। च गोप्ता। गोप्ता ताभ्याम्। ताभ्याम् नमः। नमस्तौ। तौ नः। नो मृडयताम्। मृडयताम् ते। ते यम्। यम् द्विष्मः। द्विष्मो

यः। यश्च॑। च॒ नः॒। नो॒ द्वेष्टि॑। द्वेष्टि॒ तम्। तँव्वा॑म्। वा॒म् जम्भे॑। जम्भे॑ दधामि। द॒धा॒म्यो॒ज॒स्विनी॑।
ओ॒ज॒स्विनी॒ नाम॑। नामा॑सि। अ॒सि॒ द॒क्षि॒णा। द॒क्षि॒णा दिक्। दिक् तस्या॑ः। तस्या॑स्ते। त॒
इन्द्र॑ः। इन्द्रोऽधि॑पतिः। अधि॑पति॒ः पृदा॑कुः। अधि॑पति॒रित्यधि॑—प॒तिः॒। पृदा॑कु॒ः प्राची॑। प्राची॒
नाम॑। नामा॑सि। अ॒सि॒ प्र॒तीची॑। प्र॒तीची॒ दिक्। दिक् तस्या॑ः। तस्या॑स्ते। ते॒ सोम॑ः। ॥ [४२] ॥
सोमोऽधि॑पतिः। अधि॑पतिः स्व॒जः। अधि॑पति॒रित्यधि॑—प॒तिः॒। स्व॒जो॑ऽव॒स्थावा॑। स्व॒ज इति॑
स्व—जः। अ॒व॒स्थावा॒ नाम॑। अ॒व॒स्थावेत्य॑व—स्थावा॑। नामा॑सि। अ॒स्युदी॑चि। उदी॑ची॒ दिक्।
दिक् तस्या॑ः। तस्या॑स्ते। ते॒ वरु॑णः। वरु॒णोऽधि॑पतिः। अधि॑पतिस्ति॒रश्च॑राजिः। अधि॑पति॒रि-
त्यधि॑—प॒तिः॒। ति॒रश्च॑राजि॒रधि॑पत्नी। ति॒रश्च॑राजि॒रिति॑ ति॒रश्च॑—रा॒जिः॒। अधि॑पत्नी॒ नाम॑। अधि॑-
प॒त्नीत्यधि॑—प॒त्नी। नामा॑सि। अ॒सि॒ बृ॒ह॒ती। बृ॒ह॒ती दिक्। दिक् तस्या॑ः। तस्या॑स्ते। ते॒ बृह॒-
स्पति॑ः। बृ॒ह॒स्पति॒रधि॑पतिः। अधि॑पतिः श्वि॒त्रः। अधि॑पति॒रित्यधि॑—प॒तिः॒। श्वि॒त्रो व॒शिनी॑।
व॒शीनी॒ नाम॑। नामा॑सि। अ॒सीयम्। इ॒यम् दिक्। दिक् तस्या॑ः। तस्या॑स्ते। ते॒ य॒मः। य॒मोऽधि॑-
पतिः। अधि॑पतिः क॒ल्माष॑ग्रीवः। अधि॑पति॒रित्यधि॑—प॒तिः॒। क॒ल्माष॑ग्रीवो र॒क्षि॒ता। क॒ल्मा-
ष॑ग्रीव॒ इति॑ क॒ल्माष॑—ग्री॒वः॒। र॒क्षि॒ता यः। यश्च॑। चाधि॑पतिः। अधि॑पति॒र् यः। अधि॑पति-
रित्यधि॑—प॒तिः॒। यश्च॑। च॒ गो॒प्ता। गो॒प्ता ताभ्या॑म्। ताभ्या॒म् नम॑ः। न॒मस्तौ॑। तौ न॑ः। नो॒
मृ॒ड॒य॒ता॒म्। मृ॒ड॒य॒ता॒म् ते। ते यम्। यम् द्वि॒ष्मः। द्वि॒ष्मो यः। यश्च॑। च॒ न॒ः। ॥ [४३] ॥
नो॒ द्वेष्टि॑। द्वेष्टि॒ तम्। तँव्वा॑म्। वा॒म् जम्भे॑। जम्भे॑ दधामि। द॒धा॒म्येता॑ः। ए॒ता वै। वै दे॒वता॑ः।
दे॒वता॑ अ॒ग्निम्। अ॒ग्निम् चि॒तम्। चि॒तꣳ र॑क्षन्ति। र॒क्ष॒न्ति॒ ताभ्य॑ः। ताभ्यो॒ यत्। यदाहु॑तीः।
आहु॑ती॒र् न। आहु॑ती॒रित्या—हु॒तीः॒। न जु॒हु॒यात्। जु॒हु॒याद॑द्ध्व॒र्युम्। अ॒द्ध्व॒र्युम् च॑। च॒ यज॑-
मानम्। यज॑मानम् च। च॒ ध्या॒ये॒युः। ध्या॒ये॒यु॒र् यत्। यदे॒ताः। ए॒ता आहु॑तीः। आहु॑ती॒र् जु॒होति॑।
आहु॑ती॒रित्या—हु॒तीः॒। जु॒होति॑ भाग॒धेये॑न। भा॒ग॒धेये॑नैव। भा॒ग॒धेये॒नेति॑ भाग—धेये॑न। ए॒वैना॑न्।
ए॒ना॒ञ्छ॒म॒य॒ति॒। श॒म॒य॒ति॒ न। नार्ति॑म्। आर्ति॒मा। आर्च्छे॑ति। ऋ॒च्छ॒त्य॒द्ध्व॒र्युः। अ॒द्ध्व॒र्यु॒र्
न। न यज॑मानः। यज॑मानो हे॒तय॑ः। हे॒तयो॒ नाम॑। नाम॑ स्थ। स्थ॒ तेषा॑म्। तेषा॑व्वँः। वः॒
पुरः। पु॒रो गृ॒हाः। गृ॒हा अ॒ग्निः। अ॒ग्निर् व॑ः। व॒ इष॑वः। इष॑वः सलि॒लः। स॒लि॒लो नि॑लि॒म्पाः।
नि॒लि॒म्पा नाम॑। नि॒लि॒म्पा इति॑ नि—लि॒म्पाः। नाम॑ स्थ। ॥ [४४] ॥ स्थ॒ तेषा॑म्। तेषा॑व्वँः।

वो॒ द॒क्षि॒णा। द॒क्षि॒णा गृ॒हाः। गृ॒हाः पि॒तर॑ः। पि॒तरो॑ वः। व॒ इष॑वः। इष॑वः सग॑रः। सग॑रो व॒ज्रिण॑ः। व॒ज्रिणो॒ नाम॑। नाम॑ स्थ। स्थ॒ तेषा॒ꣳ॒॑म्। तेषा॒ꣳ॒॑ वः। वः॒ प॒श्चात्। प॒श्चाद् गृ॒हाः। गृ॒हाः स्व॒प्नः॑। स्व॒प्नो॑ वः। व॒ इष॑वः। इष॑वो॒ गह्व॑रः। गह्व॑रोऽव॒स्थावा॑नः। अ॒व॒स्थावा॑नो॒ नाम॑। अ॒व॒स्थावा॑न॒ इत्य॑व—स्थावा॑नः। नाम॑ स्थ। स्थ॒ तेषा॒ꣳ॒॑म्। तेषा॒ꣳ॒॑ वः। व॒ उ॒त्त॒रात्। उ॒त्त॒राद् गृ॒हाः। उ॒त्त॒रादित्यु॑त्—त॒रात्। गृ॒हा आप॑ः। आपो॑ वः। व॒ इष॑वः। इष॑वः समु॒द्रः। स॒मु॒द्रोऽधि॑प-तयः। अधि॑पतयो॒ नाम॑। अधि॑पतय॒ इत्यधि॑—प॒तयः। नाम॑ स्थ। स्थ॒ तेषा॒ꣳ॒॑म्। तेषा॒ꣳ॒॑ वः। व॒ उ॒परि॑। उ॒परि॑ गृ॒हाः। गृ॒हा व॒र्॒षम्। व॒र्॒षꣳ॒ वः। व॒ इष॑वः। इष॑वोऽव॑स्वान्। अव॑स्वान् क्र॒व्याः। क्र॒व्या नाम॑। नाम॑ स्थ। स्थ॒ पार्थि॑वाः। पार्थि॑वा॒स्तेषा॒ꣳ॒॑म्। तेषा॒ꣳ॒॑ वः। व॒ इ॒ह। इ॒ह गृ॒हाः। गृ॒हा अन्न॒ꣳ॒॑म्। ॥ [४५] ॥ अन्न॒ꣳ॒॑ वः। व॒ इष॑वः। इष॑वो॒ निमि॒षः। नि॒मि॒षो वा॑तना॒मम्। नि॒मि॒ष इति॑ नि—मि॒षः। वा॒त॒ना॒मम् तेभ्य॑ः। वा॒त॒ना॒ममिति॑ वात—ना॒मम्। तेभ्यो॑ वः। वो॒ नम॑ः। नम॒स्ते। ते न॑ः। नो॒ मृ॒ड॒यत। मृ॒ड॒य॒त ते। ते यम्। यम् द्वि॒ष्मः। द्वि॒ष्मो यः। यश्च॑। च॒ नः॒। नो॒ द्वेष्टि॑। द्वेष्टि॑ तम्। तꣳ॒ वः। वो॒ जम्भे॑। जम्भे॑ दधामि। द॒धा॒मि॒ हु॒ताद॑ः। हु॒तादो॒ वै। हु॒ताद॒ इति॑ हुत—अद॑ः। वा अ॒न्ये। अ॒न्ये दे॒वाः। दे॒वा अ॑हु॒ताद॑ः। अ॒हु॒तादो॒ऽन्ये। अ॒हु॒ताद॒ इत्य॑हुत—अद॑ः। अ॒न्ये तान्। तान॒ग्नि॒चित्। अ॒ग्नि॒चिदे॒व। अ॒ग्नि॒चिदित्य॑ग्नि—चित्। ए॒वोभया॑न्। उ॒भया॒ꣳ॒॑न् प्री॒णा॒ति। प्री॒णा॒ति॒ द॒द्ध्ना। द॒द्ध्ना म॑धुमि॒श्रेण॑। म॒धु॒मि॒श्रेणै॒ताः। म॒धु॒मि॒श्रेणेति॒ मधु—मि॒श्रेण॑। ए॒ता आहु॑तीः। आहु॑तीर् जुहोति। आहु॑तीरित्या—हु॒तीः। जु॒हो॒ति॒ भा॒ग॒धेये॑न। भा॒ग॒धेये॑नै॒व। भा॒ग॒धेये॒नेति॑ भाग—धेये॑न। ए॒वैना॑न्। ए॒ना॒न् प्री॒णा॒ति॒। प्री॒णा॒त्यथो॑। अथो॒ खलु॑। अथो॒ इत्यथो॑। खल्वा॑हुः। आ॒हु॒रिष्ट॑काः। इष्ट॑का॒ वै। वै दे॒वाः। दे॒वा अ॑हु॒ताद॑ः। अ॒हु॒ताद॒ इति॑। अ॒हु॒ताद॒ इत्य॑-हुत—अद॑ः। इत्य॑नुपरि॒क्रामम॑म्। ॥ [४६] ॥ अ॒नु॒प॒रि॒क्रामम्॑ जुहोति। अ॒नु॒प॒रि॒क्राममित्य॑नु—प॒रि॒क्राम॒ꣳ॒॑म्। जु॒हो॒त्यप॑रिवर्गम्। अप॑रिवर्गमे॒व। अप॑रिवर्गमित्यप॑रि—व॒र्गम्। ए॒वैना॑न्। ए॒ना॒न् प्री॒णा॒ति। प्री॒णा॒तीमम्। इ॒मꣳ॒ स्तन॒ꣳ॒॑म्। स्त॒नमू॒र्जस्व॑न्तम्। ऊ॒र्जस्व॑न्तम् धय। ध॒या॒पाम्। अ॒पाम् प्रप्या॑तम्। प्रप्या॑तमग्ने। प्रप्या॑त॒मिति॒ प्र—प्या॑त॒म्। अ॒ग्ने॒ स॒रि॒रस्य॑। स॒रि॒रस्य॒ मद्ध्ये॒ꣳ॒॑। मद्ध्य॒ इति॒ मद्ध्ये॒ꣳ॒॥ उथ्स॑म् जुषस्व। जु॒ष॒स्व॒ मधु॑मन्तम्। मधु॑मन्तमूर्व। मधु॑मन्त॒मिति॒ मधु—म॒न्त॒म्। ऊ॒र्व॒ स॒मु॒द्रिय॒ꣳ॒॑म्। स॒मु॒द्रिय॒ꣳ॒ सद॑नम्। सद॑न॒मा। आ वि॑शस्व। वि॒श॒स्वेति॑ विशस्व॥ यो वै।

वा अग्निम्। अग्निम् प्रयुज्य। प्रयुज्य न। प्रयुज्येति प्र—युज्य। न विमुञ्चति। विमुञ्चति यथा। विमुञ्चतीति वि—मुञ्चति। यथाऽश्वः। अश्वो युक्तः। युक्तोऽविमुच्यमानः। अविमुच्यमानः क्षुद्ध्यन्न्। अविमुच्यमान इत्यवि—मुच्यमानः। क्षुद्ध्यन् पराभवति। पराभवत्येवम्। पराभवतीति परा—भवति। एवमस्य। अस्याग्निः। अग्निः परा। परा भवति। भवति तम्। तम् पराभवन्तम्। पराभवन्तय्ँयजमानः। पराभवन्तमिति परा—भवन्तम्। यजमानोऽनु। अनु परा। परा भवति। भवति सः। सोऽग्निम्। अग्निम् चित्वा। चित्वा लूक्षः। लूक्षो भवति। ॥ [४७] ॥

भवतीमम्। इमङ्ग् स्तनम्। स्तनमूर्जस्वन्तम्। ऊर्जस्वन्तम् धय। धयापाम्। अपामिति। इत्याज्यस्य। आज्यस्य पूर्णाम्। पूर्णाङ्ग् स्रुचम्। स्रुचम् जुहोति। जुहोत्येषः। एष वै। वा अग्नेः। अग्नेर् विमोकः। विमोको विमुच्य। विमोक इति वि—मोकः। विमुच्यैव। विमुच्येति वि—मुच्य। एवास्मै। अस्मा अन्नम्। अन्नमपि। अपि दधाति। दधाति तस्मात्। तस्मादाहुः। आहुर् यः। यश्च। चैवम्। एवव्ँवेद। वेद यः। यश्च। च न। न सुधायम्। सुधायꣳ ह। सुधायमिति सु—धायम्। ह वै। वै वाजी। वाजी सुहितः। सुहितो दधाति। सुहित इति सु—हितः। दधातीति। इत्यग्निः। अग्निर् वाव। वाव वाजी। वाजी तम्। तमेव। एव तत्। तत् प्रीणाति। प्रीणाति सः। स एनम्। एनम् प्रीतः। प्रीतः प्रीणाति। प्रीणाति वसीयान्। वसीयान् भवति। भवतीति भवति॥ ॥ [४८] ॥

(प्रतीची दिक्तस्यास्ते द्विष्मो यश्च निलिम्पा ना मे ह गृहा इति लूक्षो वसीयान् भवति) ॥ १० ॥

---

इन्द्राय राज्ञे। राज्ञे सूकरः। सूकरो वरुणाय। वरुणाय राज्ञे। राज्ञे कृष्णः। कृष्णो यमाय। यमाय राज्ञे। राज्ञ ऋश्यः। ऋश्य ऋषभाय। ऋषभाय राज्ञे। राज्ञे गवयः। गवयः शार्दूलाय। शार्दूलाय राज्ञे। राज्ञे गौरः। गौरः पुरुषराजाय। पुरुषराजाय मर्कटः। पुरुषराजायेति पुरुष—राजाय। मर्कटः क्षिप्रश्येनस्य। क्षिप्रश्येनस्य वर्तिका। क्षिप्रश्येनस्येति क्षिप्र—श्येनस्य। वर्तिका नीलङ्गोः। नीलङ्गोः क्रिमिः। क्रिमिः सोमस्य। सोमस्य राज्ञः। राज्ञः कुलुङ्गः। कुलुङ्गः सिन्धोः। सिन्धोः शिꣳशुमारः। शिꣳशुमारो हिमवतः। हिमवतो हस्ती। हिमवत इति हिम—वतः। हस्तीति हस्ती॥ ॥ [४९] ॥

(इन्द्रा॑य रा॒ज्ञे अष्टाविꣳशतिः) ॥ ११ ॥

म॒युः प्रा॑जाप॒त्यः। प्रा॒जा॒प॒त्य ऊ॒लः। प्रा॒जा॒प॒त्य इति॑ प्राजा—प॒त्यः। ऊ॒लो हली᳚क्ष्णः। हली᳚क्ष्णो वृष॒द॒ꣳ॒शः। वृ॒ष॒द॒ꣳ॒शस्ते। ते धा॒तुः। धा॒तुः सर॑स्वत्यै। सर॑स्वत्यै॒ शारिः॑। शारिः॑ श्ये॒ता। श्ये॒ता पु॑रुष॒वाक्। पु॒रु॒ष॒वाख् सर॑स्वते। पु॒रु॒ष॒वागिति॑ पुरुष—वाक्। सर॑स्वते॒ शुकः॑। शुकः॑ श्ये॒तः। श्ये॒तः पु॑रुष॒वाक्। पु॒रु॒ष॒वागा॑र॒ण्यः। पु॒रु॒ष॒वागिति॑ पुरुष—वाक्। आ॒र॒ण्योऽजः। अ॒जो न॑कु॒लः। न॒कु॒लः शका᳚। शका॒ ते। ते पौ॒ष्णाः। पौ॒ष्णा वा॒चे। वा॒चे क्रौ॒ञ्चः। क्रौ॒ञ्च इति॑ क्रौ॒ञ्चः॥ ॥ [५०] ॥

(म॒यु स्त्रयोविꣳशतिः) ॥ १२ ॥

अ॒पान् नम्रे᳚। नम्रे॑ ज॒षः। ज॒षो ना॒क्रः। ना॒क्रो मक॑रः। मक॑रः कुली॒कयः॑। कु॒ली॒क॒यस्ते। तेऽकू॑पारस्य। अकू॑पारस्य वा॒चे। वा॒चे पै᳚ङ्गरा॒जः। पै॒ङ्ग॒रा॒जो भगा॑य। पै॒ङ्ग॒रा॒ज इति॑ पैङ्ग—रा॒जः। भगा॑य कु॒षीत॑कः। कु॒षीत॑क आ॒ती। आ॒ती वा॑ह॒सः। वा॒ह॒सो दर्वि॑दा। दर्वि॑दा॒ ते। ते वा॑य॒व्या᳚ः। वा॒य॒व्या॑ दि॒ग्भ्यः। दि॒ग्भ्यश्च॑क्रवा॒कः। दि॒ग्भ्य इति॑ दिक्—भ्यः। च॒क्र॒वा॒क इति॑ चक्रवा॒कः॥ ॥ [५१] ॥

(अ॒पा मेका॒न्नविꣳ॑श॒तिः) ॥ १३ ॥

बला॑याजग॒रः। अ॒ज॒ग॒र आ॒खुः। आ॒खुः सृज॑या। सृ॒ज॒या श॒यण्ड॑कः। श॒यण्ड॑क॒स्ते। ते मै॒त्राः। मै॒त्रा मृ॒त्यवे᳚। मृ॒त्यवे॑ऽसि॒तः। अ॒सि॒तो म॒न्यवे᳚। म॒न्यवे᳚ स्व॒जः। स्व॒जः कु॑म्भी॒नसः॑। स्व॒ज इति॑ स्व—जः। कु॒म्भी॒नसः॑ पुष्करसा॒दः। कु॒म्भी॒न॒स इति॑ कुम्भी—नसः॑। पु॒ष्क॒र॒सा॒दो लोहि॑ता॒हिः। पु॒ष्क॒र॒सा॒द इति॑ पुष्कर—सा॒दः। लो॒हि॒ता॒हिस्ते। लो॒हि॒ता॒हिरिति॑ लोहित—अ॒हिः। ते त्वा॒ष्ट्राः। त्वा॒ष्ट्राः प्रति॒श्रुत्का॑यै। प्र॒ति॒श्रुत्का॑यै वाह॒सः। प्र॒ति॒श्रुत्का॑या॒ इति॑ प्रति—श्रुत्का॑यै। वा॒ह॒स इति॑ वाह॒सः॥ ॥ [५२] ॥

(बलाया ष्टादश) ॥ १४ ॥

पुरुषमृग,श्चन्द्रमसे। पुरुषमृग इति पुरुष—मृगः। चन्द्रमसे गोधा। गोधा कालका। कालका दार्वाघाटः। दार्वाघाटस्ते। दार्वाघाट इति दारु—आघातः। ते वनस्पतीनाम्। वनस्पतीनामेणी। एण्यह्ने। अह्ने कृष्णः। कृष्णो रात्रियै। रात्रियै पिकः। पिकः क्ष्विङ्का। क्ष्विङ्का नीलशीर्ष्णी। नीलशीर्ष्णी ते। नीलशीर्ष्णीति नील—शीर्ष्णी। तेऽर्यम्णे। अर्यम्णे धातुः। धातुः कत्कटः। कत्कट इति कत्कटः॥ ॥ [५३] ॥

(पुरुषमृगो ऽष्टादश) ॥ १५ ॥

सौरी बलाका। बलाकर्श्यः। ऋश्यो मयूरः। मयूरः श्येनः। श्येनस्ते। ते गन्धर्वाणाम्। गन्धर्वाणाँव्वसूनाम्। वसूनाम् कपिञ्जलः। कपिञ्जलो रुद्राणाम्। रुद्राणाम् तित्तिरिः। तित्तिरी रोहित्। रोहित् कुण्डृणाची। कुण्डृणाची गोलत्तिका। गोलत्तिका ताः। ता अप्सरसाम्। अप्सरसामरण्याय। अरण्याय सृमरः। सृमर इति सृमरः॥ ॥ [५४] ॥

(सौर्यष्टादश) ॥ १६ ॥

पृषतो वैश्वदेवः। वैश्वदेवः पित्वः। वैश्वदेव इति वैश्व—देवः। पित्वो न्यङ्कुः। न्यङ्कुः कशः। कशस्ते। तेऽनुमत्यै। अनुमत्या अन्यवापः। अनुमत्या इत्यनु—मत्यै। अन्यवापोऽर्द्ध-मासानाम्। अन्यवाप इत्यन्य—वापः। अर्द्धमासानाम् मासाम्। अर्द्धमासानामित्यर्द्ध—मासानाम्। मासाम् कश्यपः। कश्यपः क्वयिः। क्वयिः कुटरुः। कुटरुर् दात्यौहः। दात्यौ-हस्ते। ते सिनीवाल्यै। सिनीवाल्यै बृहस्पतये। बृहस्पतये शित्पुटः। शित्पुट इति शित्पुटः॥
॥ [५५] ॥

(पृषतो ऽष्टादश) ॥ १७ ॥

शका भौमी। भौमी पान्त्रः। पान्त्रः कशः। कशो मान्थीलवः। मान्थीलवस्ते। ते पितृणाम्। पितृणामृतूनाम्। ऋतूनाम् जहका। जहका सँव्वथ्सराय। सँव्वथ्सराय लोपा। सँव्वथ्सरायेति सम्—वथ्सराय। लोपा कपोतः। कपोत उलूकः। उलूकः शशः। शशस्ते। ते नैर्ऋताः। नैर्ऋताः कृकवाकुः। नैर्ऋता इति नैः—ऋताः। कृकवाकुः सावित्रः। सावित्र इति सावित्रः॥ ॥ [५६] ॥

(शका ऽष्टादश) ॥ १८ ॥

रुरू रौद्रः। रौद्रः कृकलासः। कृकलासः शकुनिः। शकुनिः पिप्पका। पिप्पका ते। ते शरव्यायै। शरव्यायै हरिणः। हरिणो मारुतः। मारुतो ब्रह्मणे। ब्रह्मणे शार्गः। शार्गस्तरक्षुः। तरक्षुः कृष्णः। कृष्णः श्वा। श्वा चतुरक्षः। चतुरक्षो गर्दभः। चतुरक्ष इति चतुः—अक्षः। गर्दभस्ते। त इतरजनानाम्। इतरजनानामग्नये। इतरजनानामितीतर—जनानाम्। अग्नये धूङ्क्ष्णा। धूङ्क्ष्णेति धूङ्क्ष्णा॥ ॥ [५७] ॥

(रुरुर् विꣳशतिः) ॥ १९ ॥

अलज आन्तरिक्षः। आन्तरिक्ष उद्रः। उद्रो मद्गुः। मद्गुः प्लवः। प्लवस्ते। तेऽपाम्। अपामदित्यै। अदित्यै हꣳससाचिः। हꣳससाचिरिन्द्राण्यै। हꣳससाचिरिति हꣳस—साचिः। इन्द्राण्यै कीर्शा। कीर्शा गृद्ध्रः। गृद्ध्रः शितिकक्षी। शितिकक्षी वार्द्ध्राणसः। शितिकक्षीति शिति—कक्षी। वार्द्ध्राणसस्ते। ते दिव्या। दिव्या द्यावापृथिव्या। द्यावापृथिव्या श्वावित्। द्यावापृथिव्येति द्यावा—पृथिव्या। श्वाविदिति श्व—वित्॥ ॥ [५८] ॥

(अलजो ऽष्टादश) ॥ २० ॥

सुपर्णः पार्जन्यः। सुपर्ण इति सु—पर्णः। पार्जन्यो हꣳसः। हꣳसो वृकः। वृको वृषदꣳशः। वृषदꣳशस्ते। त ऐन्द्राः। ऐन्द्रा अपाम्। अपामुद्रः। उद्रोऽर्यम्णे। अर्यम्णे लोपाशः। लोपाशः सिꣳहः। सिꣳहो नकुलः। नकुलो व्याघ्रः। व्याघ्रस्ते। ते महेन्द्राय। महेन्द्राय कामाय। महेन्द्रायेति महा—इन्द्राय। कामाय परस्वान्। परस्वानिति परस्वान्॥ ॥ [५९] ॥

(सुपर्णोऽष्टादश) ॥ २१ ॥

आग्नेयः कृष्णग्रीवः। कृष्णग्रीवः सारस्वती। कृष्णग्रीव इति कृष्ण—ग्रीवः। सारस्वती मेषी। मेषी बभ्रुः। बभ्रुः सौम्यः। सौम्यः पौष्णः। पौष्णः श्यामः। श्यामः शितिपृष्ठः। शितिपृष्ठो बार्हस्पत्यः। शितिपृष्ठ इति शिति—पृष्ठः। बार्हस्पत्य शिल्पः। शिल्पो वैश्वदेवः। वैश्वदेव ऐन्द्रः। वैश्वदेव इति वैश्व—देवः। ऐन्द्रोऽरुणः। अरुणो मारुतः। मारुतः कल्माषः। कल्माष ऐन्द्राग्नः। ऐन्द्राग्नः सꣳहितः। ऐन्द्राग्न इत्यैन्द्र—अग्नः। सꣳहितोऽधोरामः। सꣳहित इति सम्—हितः। अधोरामः सावित्रः। अधोराम इत्यधः—रामः। सावित्रो वारुणः। वारुणः पेत्वः। पेत्व इति पेत्वः॥ ॥ [६०] ॥

(आग्नेयो द्वाविꣳशतिः) ॥ २२ ॥

अश्वस्तूपरः। तूपरो गोमृगः। गोमृगस्ते। गोमृग इति गो—मृगः। ते प्राजापत्याः। प्राजापत्या आग्नेयौ। प्राजापत्या इति प्राजा—पत्याः। आग्नेयौ कृष्णग्रीवौ। कृष्णग्रीवौ त्वाष्ट्रौ। कृष्णग्रीवाविति कृष्ण—ग्रीवौ। त्वाष्ट्रौ लोमशसक्थौ। लोमशसक्थौ शितिपृष्ठौ। लोमशसक्थाविति लोमश—सक्थौ। शितिपृष्ठौ बार्हस्पत्यौ। शितिपृष्ठाविति शिति—पृष्ठौ। बार्हस्पत्यौ धात्रे। धात्रे पृषोदरः। पृषोदरः सौर्यः। पृषोदर इति पृष—उदरः। सौर्यो बलक्षः। बलक्षः पेत्वः। पेत्व इति पेत्वः॥ ॥ [६१] ॥

(अश्वः षोडश) ॥ २३ ॥

अ॒ग्नयेऽनी॑कवते। अनी॑कवते॒ रोहि॑ताञ्जिः। अनी॑कवत॒ इत्यनी॑क—व॒ते॒। रोहि॑ताञ्जिरन॒ड्वान्। रोहि॑ताञ्जि॒रिति॒ रोहि॑त—अ॒ञ्जि॒ः। अ॒न॒ड्वा॒नधोरा॑मौ। अ॒धोरा॑मौ सावि॒त्रौ। अ॒धोरा॑मा॒वित्य॒धः—रा॒मौ॒। सा॒वि॒त्रौ पौ॒ष्णौ। पौ॒ष्णौ र॑ज॒तना॑भी। र॒ज॒तना॑भी वैश्वदे॒वौ। र॒ज॒तना॑भी॒ इति॑ र॒जत—ना॒भी॒। वै॒श्व॒दे॒वौ पि॒शङ्गौ᳚। वै॒श्व॒दे॒वाविति॑ वैश्व—दे॒वौ। पि॒शङ्गौ॑ तू॒परौ। तू॒परौ॒ मा॑रु॒तः। मा॒रु॒तः क॒ल्माषः॑। क॒ल्माष॑ आ॒ग्ने॒यः। आ॒ग्ने॒यः कृ॒ष्णः। कृ॒ष्णो॑ऽजः। अ॒जः सा॑रस्व॒ती। सा॒र॒-स्व॒ती मे॒षी। मे॒षी वा॑रु॒णः। वा॒रु॒णः कृ॒ष्णः। कृ॒ष्ण एक॑शितिपात्। एक॑शितिपा॒त् पेत्वः॑। एक॑-शितिपा॒दित्येक॑—शि॒ति॒पा॒त्। पेत्व॒ इति॒ पेत्वः॑॥ ॥ [६२] ॥

(अ॒ग्नये॒ द्वावि॑ꣳशतिः) ॥ २४ ॥

॥ हरिः ॐ ॥

पञ्चमकाण्डे पञ्चमः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
| --- | --- |
| २४ | ६२ |

ॐ